69a. Foll. 4; size and writing as last MS.

Budha-smṛiti. A set of rules on the duties of castes.

It runs as follows: अथ बुधस्मृतिः ॥ अथातो बुधधर्मशास्त्रं व्याख्यास्यामः ॥

श्रेयोऽभ्युदयसाधनो धर्मः ॥ गर्भाष्टमे ब्राह्मणो वसंत आत्मानमुपनयेत् ॥ एकादशे क्षत्रियो ग्रीष्मे ॥ द्वादशे वैश्यो वर्षासु ॥ मेखलाजिनदंडकमंडलूपवीतानि धारयेत् ॥ वेदानधीत्य शुश्रूषां कुर्वन्दृष्टार्थांस्तनुयात् ॥ सावित्रीवेदव्रतीकोपनिषद्दोदानत्रिपुव-(1. सुप)र्णिकव्रतानि चरेत् ॥ गुरुणानुज्ञातः स्नायात् ॥ सवर्णां भार्यामुद्वहेत् ॥ मातृतः पितृतः पंचमीं दशमीमन्यगोत्रजां ॥ ब्राह्मदैवार्षप्राजापत्यगांधर्वासुरपैशाचराक्षसाः ॥ ऋतावुपेयात् ॥ युग्मासु पुत्रमुत्पादयेत् ॥ गर्भाधानपुंसवनसीमंतोन्नयनसोष्यंतीकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाकरणोपनयनं यावदग्न्याधानं ॥ तस्मिन् गृह्याणि देवपितृमनुष्यभूतपक्षकर्माणि कुर्यात् ॥ अतिथीन्पूजयेद् भृत्यान्बंधून् पोष्यवर्गांश्च ॥ श्वपाकपतितादिभ्यो भूमौ दत्त्वा ब्राह्मणान्भोजयेत् ॥ पित्रष्टकापार्वणश्राद्धाष्टकान्वष्टका[न्य]ग्रहा[न्य]णीचैत्याश्वयुजीं च पाकयज्ञं कुर्यात् ॥ अग्नीनाधायाग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि निरूढपशुरनूबंध्यः सौत्रामणीति हविर्यज्ञान्कुर्यात् ॥ अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्यामः इति सोमयागाननुतिष्ठेत् ॥ दया सर्वभूतेषु क्षान्तिरनुसूया शौचं(? च)मनायासेन मंगलमकार्पण्यमस्पृहेति कुर्यात् ॥ न्यायागतधनेन कर्माणि ॥ अध्यापनं याजनं प्रतिग्रहः सवैक्रयविक्रयसंविभागपरिग्रहाधिगमशिलोंछनमयाचितकर्षण-वाणिज्यानि वृत्तयः ॥ तदसंभवे क्षत्रियवृत्त्या ॥ आपत्काले असाधु[भ्यः?] प्रतिगृह्णीयात् ॥ वृत्तिसंकरं न कुर्यात् ॥ कर्मवृत्तिसंकरौ रक्षेत्कुलशुद्धयर्थं ॥ कृषिः पाशुपाल्यं वाणिज्यं वैश्यकर्म ॥ शूद्रस्य विद्धि कर्म ब्राह्मणादीनां त्रयाणां भर्तृशुश्रूषाम-[? न]भिचरतस्तस्य गुरुभक्तिः प्रणामश्चेति धर्मः ॥ कृतकृतस्य वानप्रस्थ्यं ॥ विरक्तस्य पारिव्राज्यं ॥ स्वधर्मानुष्ठानं वर्णानामाश्रमाणां च ॥ विहिताकरणे प्रतिषिद्धसेवने यावन्नदकुर्वतो नरकप्राप्तिः ॥ विहितमकुर्वतो राज्ञा कारयितव्याः ॥ कंटकांश्छोधयेत् ॥ व्यवहारानेकार्थिनां निर्णयेत् ॥ बलवतश्चैतान्-(? l. बलवच्चैतान्) स्वधर्मे स्थापयेत् ॥ तेषु परस्वे दंडं दापयेत् ॥ तथा कुर्वतः कारयतश्चोभयोर्धर्मसिद्धिः ॥ तस्य धर्मो विनातो (l. धर्मविनीतो) व्यसनी निरूपितमंडलाध्यक्षः प्रक्षिपेत् संधिविग्रहासन(ने Berl.)यानसंश्रयद्वैधीभावान्कार्यार्थं(? l. कार्यार्थी) कारयेत् ॥ बलीयांसं (०या ' MS. & Berl.)प्रणमयेत् ॥ अनिच्छति पलायनं ॥ उपरुध्य परदुर्गं गृह्णीयात् ॥ मंत्रीपधिप्रयोगेण परं निःसंज्ञं (निःसंगं Berl.) कृत्वा राज्यं गृह्णीयात् ॥ गृहीत्वा देवब्राह्म[ण]पूजनं ॥ एवं कुर्वन्दृष्टमदृष्टं फलं [ल]भतेति ॥ इति बुधप्रोक्तं धर्मशास्त्रं समाप्तं ॥

For other MSS., see Rāj. Mitra, Notices, viii., p. 130 (? the original of the present copy); Burnell, Index Tanj. MSS., p. 125*b*; Weber, Cat. Berl. II., no. 1753.

[H. T. Colebrooke.]

1324.

69b. Foll. 9; size and writing as last MS.

Bṛihaspati-smṛiti, in 65 *ślokas*.

It begins: अथ बृहस्पतिस्मृतिः ॥

इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणं ।
भगवंतं गुरुं श्रेष्ठं पर्यपृच्छद् बृहस्पतिं ॥ १ ॥
भगवन् केन दानेन सर्वतः सुखमेधते ।
यदक्षयं महार्थं च तन्मे ब्रूहि महातप[ः] ॥ २ ॥
एवमिंद्रेण पृष्टो ऽसौ देवदेवपुरोहितः ।
वाचस्पतिर्महाप्राज्ञो बृहस्पतिरुवाच ह ॥ ३ ॥

It ends:

बृहस्पतिमतं पुण्यं ये पठंति द्विजातयः ।
चत्वारि तेषां वर्धंते आयुर्विद्या यशो बलं ॥

इति बृहस्पतिप्रणीतं धर्मशास्त्रं ॥

The MS. follows the same order of *ślokas* as the Calc. Dh. I., pp. 644–651; omitting, however, the following lines:—p. 646, ll. 13–20, 24; p. 647, ll. 1, 4, 5, 10–16; p. 648, ll. 2, 3, 20, 21; p. 649, ll. 3, 4, 23; p. 650, ll. 1, 3, 14–17. [H. T. Colebrooke.]

1325.

2096b. Foll. 4; size 9 in. by 6¼ in.; indifferent Devanāgarī writing of the latter part of last century; 14–16 lines in a page.

Bṛihaspati-smṛiti, in 76 *ślokas*.

It begins:

दृष्ट्वा शतक्रतुं राजा समाप्तवरदक्षिणा (!) ।
भगवान्महायशाः श्रेष्ठः समपृच्छद्बृहस्पतिं ॥ १ ॥
भगवन्° २ ॥ एवमिंद्रेण ° ३ ॥

स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः ।
पितरः पादशौचेन सोक्षयः परमां गतिं ॥ ४ ॥
हिरण्यदानं गोदानं ० ४ ॥

This copy inserts the following lines:

After p. 645, l. 4:

धनुर्विश्रमते यत्र आपूर्तैर्यस्य धारणैः ।
तं गोचर्मं जानियाद् (!) दत्त्वा पापैः प्रमुच्यते ॥ ९ ॥

After ib. l. 8:

निःशंकं चरते यत्र गवामेकोत्तरं शतं ।
गोचर्मेमिति तद्वयाद् दृश्यते शास्त्रनिश्चयः ॥ १२ ॥

After ib. l. 14:

यथा बीजानि रोहंति प्रकीर्णानि महीतले ।
एवं कामाः प्ररोहंति भूमिदानसमन्विताः ॥ १५ ॥
इक्षुभिः संस्थितां भूमिं व्रीहीभिर्यवशाड्वलैः ।
यो ददाति सुरश्रेष्ठ न स प्रच्यवते पुनः ॥ १६ ॥
सौवर्णा यत्र प्रासादा वासोद्धाराश्च मंडपाः ।
गंधर्वाप्सरसो यत्र तत्र गच्छति भूमिदः ॥ १७ ॥

After p. 646, l. 22:

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।

It omits p. 647, ll. 8–11, 20, 21; p. 649, ll. 2–5, 14–16; p. 650, ll. 8, 9; and varies considerably in order, and otherwise, as regards p. 648, l. 9—p. 649, l. 1. [GAIKAWAR.]

1326.

3245a. Foll. 1*a*–2*a*; size 15¼ in. by 9½ in.; folio; European paper; Telugu character; 38 and 41 lines in a page.

Bārhaspatya-smṛiti.

It begins:

इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणः ।
मखवान् वाग्विदां श्रेष्ठं पर्यपृच्छद् बृहस्पतिं ॥
भगवन् केन दानेन स्वर्गतः सुखमेधते ।
तदक्षय्यं महार्घ्यं च त्वं ब्रूहि भवतां वर ॥
एवं पृष्टः स इंद्रेण देवदेवपुरोहितः ।
वाचस्पतिर्महातेजाः शतक्रतुमुवाच ह ॥
सुवर्णदानं भूदानं गोदानं चैव वासव ।
एतत्प्रयच्छमानो हि स्वर्गतः सुखमेधते ॥
सुवर्णं रजतं वस्त्रं मणिरत्नविभूषणं च ।
सर्वमेतद्भवेद्दत्तं वसुधा यत्प्रयच्छति ॥
फालकृष्टां महीं दद्यात् सबीजां सस्यमालिनीं ।
यावत् सूर्यकरा लोकास्तावत्स्वर्गे महीयते ॥
यत्किंचित् ० । अपि गोचर्ममात्रेण ० ॥
सप्तहस्तेन (!) दंडेन चिंशद्दंडनिवर्तनं ।
दश तान्येव गोचर्मं इति वेदविदो विप्रः (? विदुः) ॥
विप्राय दद्यात्सुगुणान्विताय ० । यावन्महीं तिष्ठति ० ॥
यथा गौर्भरते वत्सं क्षीरिणी क्षीरमुत्सृजेत् ।
एवं दत्ता सहस्राक्ष भूमिर्भरति भूमिदं ॥
इक्षुभिः सहितां भूमिं व्रीहिभिर्यवशाड्वलैः ।
यो ददाति सुरश्रेष्ठ न स प्रच्यवते दिवः ॥
शंखभद्रासनच्छत्रं वराश्या(l. चरस्या)वरयोषितः ।
भूमिदानस्य चिह्नानि फलमेतत्पुरंदर ॥
गामेकां रत्नमेकं वा भूमेरप्येकमंगुलं ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवं ॥
बहुभिर्वसुधा दत्ता ० । यस्य यस्य यदा भूमिः ० ॥
भूमिं यः प्रतिगृह्णाति ० । तावुभौ पुण्यकर्माणौ ० ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधरां ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥
अन्यायेन हृता भूमिरन्यायेन त (? च) हारिता ।
हरतो हारकस्यैव दहत्यासप्तमं कुलं ॥ ०
पंचतन्मात्रते हंति साक्षी साक्ष्यं मृषा वदन् । ०

There is, throughout, a similar difference from the printed text both as regards arrangement and matter; but even the readings of these S. Indian MSS. are of some interest, as many of these verses are constantly quoted in grants of land.

This MS. has altogether 56 *ślokas*, ending thus:

निष्कत्रयमिदं रूप्यदशदानप्रमाणिकं ।
अष्टगुंजासमं प्रश्निः (!) प्रश्नौ पञ्चिस्तुला स्मृताः (!) ॥
तुलार्धं तु निष्कं स्यात् चतुर्निष्कं सुवर्णकं ।
अष्टमुष्टि भवेत् किंचित् किंचिदष्टौ च पुष्कलं* ॥
पुष्कलानि च चत्वारि आढकः परिकीर्तितः ।
आढकश्चतुरो द्रोण इत्येवं मानलक्षणं ॥
इति वाहैस्पत्यस्मृतिः समाप्ता ॥

* अष्टमुष्टिर्भवेत्कुञ्चिः कुञ्चयो ऽष्टौ च पुष्कलम् । Kull. on M. 7, 126.

GSL

1327.

3246d. Foll. 10*a*–13*b*; size 8¾ in. by 7½ in.; 4to; Telugu character; 18–20 lines in a page.

Bṛihaspati-smṛiti. It begins:

इष्ट्वा क्रतुशतं राजा समग्रवरदक्षिणं ।
मघवान् वाग्मिनां श्रेष्ठः पर्यपृच्छद्बृहस्पतिं ॥ °
भगवन् केन दानेन स्वर्गतः सुखमेधते ।
यदक्षयं महार्घं च तद्ब्रूहि वरतां (!) वर ॥
एवं पृष्टः स देवेन देवदेवपुरोहितः ।
वाचस्पतिर्महातेजाः पुरुहूतमुवाच ह ॥
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेव गुरुः स्त्रीणां सर्वस्याप्यागतो गुरुः ॥
सुखतप्तेषु आदित्यः संभाषेण सरस्वती ।
स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः ॥
पितरः पादशौचेन अन्नाद्येन प्रजापतिः ।
वैश्वदेवे स्वयं ब्रह्म भुंजते हि ते त्रयः (!) ॥
अतिथिं चागतं दृष्ट्वा देशकाल(l. ले)पराङ्मुखः ।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
सुवर्णदानं गोदानं भूमिदानं च वासव ।
एतत्प्रयच्छमानो ऽपि स्वर्गतः सुखमेधते ॥
सुवर्णं रजतं वस्त्रं मणिं रत्नं वसुंधरां । °

This text consists of 79 *ślokas*.

It ends:

न्यायार्जितस्य द्रव्यस्य दानधर्मौ प्रकीर्तितौ ।
अपात्रे प्रतिपत्तिश्च पात्रे च प्रतिपालनं ॥
दानपालनयोर्मध्ये दानात्प्रेयो ऽनुपालनं ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं परं ॥
एकैव भगिनी मोक्षे (? मोक्ष) सर्वेषामेव भूभुजां ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
इति बृहस्पतिकृतं धर्मशास्त्रं संपूर्णं ॥

[MACK. COLL.]

1328.

2047c. Foll. 4; size 11 in. by 5 in.; good, modern Devanāgarī writing; ten lines in a page.

Laghu-Bṛihaspati-smṛiti, in 49 *ślokas*.

It begins:

बृहस्पतिकृतं पुण्यं प्रवक्ष्यामि विशेषतः ।
यच्छ्रुत्वा तु नलो राजा सर्वपापैः प्रमुच्यते ॥ १ ॥
इष्ट्वा [क्र]तुशतं राजा ° २ ॥ भगवन्केन ° ३ ॥
एवमिंद्रेण ° ४ ॥
स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः ।
विष्णुस्तु पादशौचेन अन्नाद्येन प्रजापतिः ॥ ५ ॥
पादशौचं तथाभ्यंगं दीपमन्नं प्रतिश्रयं ।
ये ददंति सहस्राक्ष नोपसर्पंति ते यमं ॥ ६ ॥
सुवर्णदानं ° ७ ॥
अग्नेरपत्यं प्रथमं सुवर्णं
भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवंति दत्ता
यः कांचनं गां च महीं च दद्यात् ॥ ८ ॥
सर्वेषामेव दानानामेकं जन्मानुगं फलं ।
हाटकक्षितिगीरीणां सप्तजन्मानुगं फलं ॥ ९ ॥
यः कश्चित्कुरुते पापं ° १० ॥
निःशंकं चरते यत्र गवामेकोत्तरं शतं ।
गोचर्म इति तद्ब्रूयात् ऋषिभिः परिकीर्तितं ॥ ११ ॥
दशहस्तेन ° १२ ॥
धेनुभिश्रमते यत्र आकर्षोदरपूरितं ।
तं च हस्तं विजानीयात् राजहस्तः स उच्यते ॥ १३ ॥
विप्राय दद्यात्सगुणान्विताय ° १४ ॥
यथाम्भु पतितं तैलं तैलबिंदु विसर्पति ।
एवं भूमिकृतं दानं सस्ये सस्ये प्ररोहति ॥ १५ ॥
कालकृष्टां महीं दद्यात् सबीजां सस्यमालिनीं ।
यावत्सूर्येकृतान् लोकान् तावत्स्वर्गे महीयते ॥ १६ ॥
इक्षुभिः संततां भूमिं व्रीहिभिर्यवशाद्वलैः ।
यो ददाति सहस्राक्ष न स प्रच्यवते दिवः ॥ १७ ॥
यथा गौर्भरते वत्सं क्षीरिणी क्षीरमुत्सृजेत् ।
एवं दत्ता सहस्राक्ष भूमिर्भरति भूमिदं ॥ १८ ॥
शंखं भद्रासनं ° १९ ॥
आदित्यो वरुणो विष्णुर्ब्रह्मा ° २० ॥
सौवर्णा यत्र प्रासादा वासोद्धाराश्च कामदाः ।
गंधर्वाप्सरसो यत्र तत्र तिष्ठंति भूमिदाः ॥ २१ ॥
आस्फोटयंति ° २२ ॥
सगरस्य दिलीपस्य ययातेर्नहुषस्य च ।
अन्येषां च नरेंद्राणां त्यक्त्वा भूमिं दिवं गताः ॥ २३ ॥

बहुभिर्वैमुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ २४ ॥ °

It ends:

आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु ।
विनाशं(!) पात्रदौर्बल्यात् न तत्पात्रं विधीयते ॥ ४५ ॥
[(Dh., p. 649, l. 10).

एवं गावो हिरण्यं च वस्त्रमन्नं महीं तिलान् ।
अविद्वान्प्रतिगृह्णीयात् भस्मीभवति काष्ठवत् ॥ ४६ ॥
अश्रोत्रियस्य विप्रस्य क्रियाहीनस्य पार्थिव ।
प्रतिग्रहो न दातव्यो न जले तारयेत् शिला ॥ ४७ ॥
श्रोत्रियाय कुलीनाय दरिद्राय पुरंदर ।
शांताय वै गृहस्थाय दत्तं भवति चाक्षयं ॥ ४८ ॥
एतेषु चैव यद्दत्तं दानं प्रेक्षेषु(? l. पात्रेषु) शक्तितः ।
कुलान्युद्धरते पुंसां दशपूर्वान्दशावरान् ॥ ४९ ॥

इति श्रीबृहस्पतिप्रोक्तं धर्मशास्त्रं लघु समाप्तं ॥ लघुबृहस्पतिस्मृतिः ॥ [GAIKAWAR.]

1329.

2489a. Foll. 5; size 11 in. by 5¼ in.; well written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Yama-smṛiti [A], a treatise on purification, different from the one printed in the Calc. Dh. I., pp. 560–567, but agreeing with that described in Burnell's Index of Tanj. MSS., p. 126*a*. It begins:

श्रुतिस्मृत्युदितं धर्मं वर्णानामनुपूर्वशः ।
प्राब्रवीदृषिभिः पृष्टो मुनीनामग्रणीर्यमः ॥ १ ॥
यो भुंजानो ऽशुचिर्वापि चंडालं पतितं स्पृशेत् ।
क्रोधादज्ञानतो वापि तस्य वक्ष्यामि निष्कृतिं ॥ २ ॥
षड्रात्रं वा त्रिरात्रं वा यथासंख्यं समाचरेत् ।
स्नात्वा त्रिषवणं विप्रः पंचगव्येन शुध्यति ॥ ३ ॥
भुंजानस्य तु विप्रस्य कदाचित् सवतो गुदं ।
उच्छिष्टत्वे ऽशुचित्वे च तस्य शौचं विनिर्दिशेत् ॥ ४ ॥
पूर्वं कृत्वा द्विजः शौचं पश्चादप उपस्पृशेत् ।
अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति ॥ ५ ॥
निगिरत्यदि मेहेत (मेहेन्नत् B) भुक्ता वा मेहने कृते ।
अहोरात्रोषितो भूत्वा जुहुयात्सर्पिषाहुतिं ॥ ६ ॥
यदा भोजनकाले स्यादशुचिर्ब्राह्मणः क्वचित् ।
भूमौ निधाय तद् ग्रासं स्नात्वा शुद्धिमवाप्नुयात् ॥ ७ ॥
भक्षयित्वा तु तद् ग्रासमुपवासेन शुध्यति ।
अशित्वा चैव तत्सर्वं त्रिरात्रमशुचिर्भवेत् ॥ ८ ॥

Up to *śloka* 13, this treatise is very similar to the *Vṛiddha-Śātātapasmṛiti*, no. 1360, below.

It consists of 99 *ślokas*, the last but one of which is wanting in this MS.:

आपो देवगणाः प्रोक्ताः आपः पितृगणास्तथा ।
तस्मादप्सु जलं देयं पितृणां हितमिच्छता ॥ ९६ ॥
[दिवा संध्यासु सततं (दिवा सूर्यांशुभिस्तप्तं B) रात्रौ [नक्षत्रमारुतैः ।
संध्ययोरुभाभ्यां (° रुभाभ्यां B) च पवित्रं सर्वदा [जलं ॥ other MSS.]
स्वभावयुक्तमव्याप्तमेध्येन सदा शुचि ।
भांडस्थं धरणीस्थं वा पवित्रं सर्वदा जलं ॥ ९७ ॥
[देवतानां पितृणां च जले दद्याज्जलांजलीन् ।
असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलीन् ॥ ९८ ॥]
श्राद्धे हवनकाले तु दद्यादेकेन पाणिना ।
उभाभ्यां तर्पणे दद्यादिति धर्मो व्यवस्थितः ॥ ९९ ॥

इति श्रीयमप्रणीतधर्मशास्त्रं समाप्तं ॥ यमस्मृतिः समाप्ता ॥ [GAIKAWAR.]

1330.

2096c. Foll. 5; size 9½ in. by 6½ in.; legibly written, in Devanāgarī, towards the end of last century; 13–19 lines in a page.

Yama-smṛiti. [B]. [GAIKAWAR.]

1331.

3247a. Foll. 1*a*–4*a*; size 10 in. by 7½ in.; 4to.; Telugu character; 21 or 22 lines in a page.

The same work [C].

Colophon: इति श्रीयमऋषिणा विरचितधर्मशास्त्रे सर्वधर्मप्रसंगो नाम प्रथमो ऽध्यायः ॥

[MACK. COLL.]

1332.

3248a. Foll. 1*a*–5*a*; size 9½ in. by 7¾ in.; 4to.; Telugu character; 19–21 lines in a page.

The same work [D].

Colophon as in last MS.

[MACK. COLL.]

1333.

3249a. Foll. 1*a*–4*a*; size 10 in. by 7¾ in.; 4to; Telugu character; 19–21 lines in a page.

Another copy of the *Yama-smriti* [E]; with the same colophon as in last MSS. These three copies are probably derived from the same original. [MACK. COLL.]

1334.

3245e. Foll. 15*a*–16*b*; size 15¼ in. by 9½ in.; folio; European paper; Telugu character; 39 or 40 lines in a page.

Yama-Dharmaśāstra, different from the preceding treatise.

It begins:

आश्रमस्थं सुखासीनं वेदशास्त्रविशारदं ।
अपृच्छद्वृषयो गत्वा यमं यतमानसं (? यतित° or संय°) ॥
ऋषयः । महापात[क]संयुक्ता उपपातकिनस्तथा ।
यैर्यैर्वितैर्विशुध्यंति (?यैर्विहितै°) तन्नो ब्रूहि महामुने ॥
यमः । दिवा वाताकसंसृष्टं रात्रौ नक्षत्रमारुतैः ।
संध्याद्ययोर्वा संध्याभ्यां पवित्रं सर्वदा जलं ॥
स्नानयुक्तमथाचममेध्येन सदा शुचिः ।
अपादोष्ट्रहयाद्यैश्च मानुषैश्चरितं विना ॥
दृष्ट (?इष्ट्वा) स्नात्वा शुचिः सद्यो नरः संध्यादिरात्रिषु ।
अत्यादज्ञानते (? अद्यादज्ञानतो) भुक्ता चंडालान्नमथापि [वा ॥

It consists of 57 *ślokas* (*śl.* 38–57 in the *indravajrā* metre) ending thus:

केचिद्वदंत्येवमिमं प्रमाणं
नित्यं तज्जीवो म्रियते कदाचित् ।
वेदैश्च पृष्टमृषिभिश्च गीतं
चांद्रायणादीनीह पावनानि ॥
पापा यदिच्छंति हिताय कर्तुं
संसारमिच्छंति हिताय कर्तुं ।
संसारमिच्छंति फलं तदा स्याज्
ज्ञानप्रदीपेन तमोंधकारे ॥
इति यमकृतधर्मशास्त्रं समाप्तं ॥

[MACK. COLL.]

1335.

723b. Foll. 4; size 12¾ in. by 5¾ in.; good, modern Devanāgarī writing; ten lines in a page.

Likhita-Dharmaśāstra [A].

It begins:

इष्टापूर्तं तु कर्तव्यं ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते स्वर्गं पूर्तं मोक्षमवाप्नुयात् ॥

It consists of 97 *ślokas* (not numbered), which follow the order of the text in the Calc. Dh. II., pp. 375–382 (92 *ślokas*), with the following five additional verses:—after p. 377, l. 19, it inserts:

अग्नौ करणशेषं तु विश्वदेवादि हूयते ।
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ॥
यो ह्यग्निः स द्विजो विप्रैर्वेददर्शिभिरुच्यते ।
अजस्य दक्षिणे कर्णे पाणौ विप्रस्य दक्षिणे ॥
रजते च सुवर्णे च नित्यं वसति पावकः ।
यत्र यत्र प्रदातव्यं श्राद्धं कुर्वीत पार्वणं ॥

p. 380, last line, it reads:

उद्यताः सह धावंते सर्वे ये शस्त्रपाणयः ॥

and then inserts:

यद्येकोऽपि हनेत्तत्र सर्वे ते ब्रह्मघातकाः ।
बहूनां शस्त्रघातानां यद्येको कर्मघातकः ॥

after p. 381, l. 4, it inserts:

स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये ।
महापातकिसंस्पर्शे स्नानमेव विधीयते ॥

It ends:

यत्र यत्र च संक्रीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्यष्टशतं जपेत् ॥
इति श्रीलिखितप्रोक्तं धर्मशास्त्रं संपूर्णं ॥

[H. T. COLEBROOKE.]

1336.

2047e. Foll. 5; size 11 in. by 5 in.; fairly written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Likhita-Dharmaśāstra, in 94 *ślokas* (numbered) [B].

Rather incorrect.

This MS. has the same additional five *ślokas* as A; but omits p. 377, ll. 5, 8, 14, 15, 17–19.

[GAIKAWAR.]

1337.

2096d. Foll. 3; size 9½ in. by 6½ in.; legibly written, in Devanāgarī, about 1750 A.D.; 13–16 lines in a page.

A shorter recension of the same treatise, but ascribed to *Śaṅkha*. It consists of only 71 *ślokas* (numbered), and otherwise also differs very considerably in its readings from the foregoing MSS.

It begins:

इष्टापूर्तं तु कर्तव्यौ ब्राह्मणेन विशेषतः ।
इष्टेन लभते स्वर्गं मोक्षं पूर्तेन विंदति ॥ १ ॥
एकाहमपि कौंतेय भूमिस्थमुदकं कुरु ।
कुलानि तारयेत्सप्त यत्र गौर्विंतृषी भवेत् ॥ २ ॥ ०

On p. 376 (Calc. Dh. II.), ll. 4–9, 18–21 are omitted in this MS. In the first part of this version there is more agreement with the larger treatise than in the latter part.

It ends:

बालत्वे तद्दशाहे तु प्रेतत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्यात् नाशौचं नैव सूतकं ॥

[Dh. II., p. 382, ll. 8, 9.

अहस्त्वदत्तकन्यासु बालेषु च विशोधनं ।
कुर्वंनैवाशिनीयातमातुलश्रोत्रिये तथा (!) ॥ ६४ ॥
आ दंतजन्मनः सद्यः आ चौडात्रैशिकी स्मृता ।
त्रिरात्रं तु व्रतादेशाद्दशरात्रमतः परं ॥ ६५ ॥
ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत् ।
अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा ॥ ६६ ॥
आममांसं घृतं क्षौद्रं स्नेहश्च फलसंभवाः ।
म्लेच्छभांडस्थिता ह्येते निष्क्रांताः शुचयः स्मृताः ॥ ६७ ॥
दिवा कपित्थच्छायासु रात्रौ दधिफलेषु वा ।
धात्रीफलेषु सप्तम्यां (!) अलक्ष्मीर्विसते सदा ॥ ६८ ॥
शूर्पवातनखाग्रांतकेशबंधघटोदकं ।
मार्जनीरेणुसंस्पर्शं हंति पुण्यं दिवा कृतं ॥ ६९ ॥
अर्धवासस्तु यः कुर्याज्जपहोमक्रिया द्विजः ।
तत्सर्वं राक्षसं विंद्या (? विद्याद्) वह्निर्जीर्णं च यत्कृतं ॥ ७० ॥
यत्र यत्र च संकीर्णं पश्यत्यात्मं न संशयं (!) ।
तत्र तत्र तिलैर्होमं (l. °मो) गायत्र्यावर्तनं तथा ॥ ७१ ॥

इति शंखकृते शंखस्मृतिः संपूर्णा ॥

[GAIKAWAR.]

1338.

3246e. Foll. 13*b*–16*b*; size 8¾ in. by 7½ in.; 4to; coarse Indian paper; Telugu character; 13–24 lines in a page.

Another similar shorter recension of the *Likhita-smṛiti*, likewise ascribed to *Śaṅkha*. Though agreeing in many respects with the preceding version, it yet differs from it considerably, both in regard to matter and various readings. It also has a special introduction (whence it might be called *Dālbhya-smṛiti*); viz.:

कृताभिषेकं तु दाल्भ्यमाश्रमे समुपस्थितं ।
पर्यपृच्छंस्तु धर्मांश्च ऋषयो वेदपारगाः ॥
धर्माधर्मविवेकं च शुद्धिं जातमृतस्य च ।
अभक्ष्याणि च वस्तूनि मासशुद्धिं तथैव च ॥
श्राद्धकल्पं च [? ब्राह्मणं] गोघ्नं चंडालसंकरं ।
परिवित्तिपरिवेत्ता च कथये ऽहं यथातथं ॥

दाल्भ्य उवाच ।

स्मृतिसारं प्रवक्ष्यामि यथा शंखेन भाषितं ।
इष्टापूर्तविधींश्चैव प्रायश्चित्तविधिं तथा ॥
इष्टापूर्तं च कर्तव्यं ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते मोक्षं पूर्तो स्वर्गं विधीयते ॥
भूमिदानेन ये लोका गोदानेन च कीर्तिताः ।
तान् लोकान् प्राप्नुयात्सर्वान् पादपानां प्ररोपणं ॥ ०

There are altogether 74 *ślokas*, ending thus:

बालकौतदशाहे तु ० । सद्य एव विशुध्य स्याद ० ॥
आ दंतजन्मनः ०। आविवाहत्रिरात्रं स्याद्दशरात्रमतः परं॥
अहस्यदत्तकन्यासु ० ।
कुर्वीतैवाप्यनूचाने मातुलश्रोत्रियेषु च ॥
आदावारभ्य चाशौचं संयो[गो] यस्य नाग्निभिः ।
दहनाद्येव कर्तव्यं यस्य वैतानिको विधिः ॥
शावाशौचे समुत्पन्ने सूतकं तु यथा भवेत् ।
शावेन शुध्यते सूतिर्न सूत्या [शाव]शोधनं ॥
दाराग्निहोत्रसंयोगं यः करोत्यग्रजे स्थिते ।
परिवेत्ताशी विज्ञेयः परिवित्तस्तु पूर्वजः ॥
परिवित्तिः परिवेत्ता यया च परिविंदति ।
सर्वे ते नरकं यांति दातृयाजकपंचमाः ॥
[(Manu III. 171-2).

कुष्ठे वामनषंडेषु गंडदेषु जडेषु च ।
जात्यंधे बधिरे मूके न दोषः परिवेदने ॥
पितृव्यपुत्राः सापत्न्याः परनारीसुताश्च ये ।
दाराग्निहोत्रसंयोगान्न दोषः परिवेदने ॥

[The preceding six *ślokas* do not occur in the other version].

ज्येष्ठो भ्राता यदा ० । अनुज्ञातस्तु कुर्वीत ० ॥
आममांसं ० ।
शूद्रभांडस्थिता दृष्टा शुद्धाः पात्रांतरं गताः ॥
दिवा कपित्थच्छायायां रात्रौ दधिशमीषु च ।
धात्रीफलेषु सप्तम्यां दुर्लक्ष्मी वसते सदा ॥
यत्र यत्र तु संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्रैति वै होमो गायत्र्यावर्तनं तदा ॥
य इदं धर्मशास्त्रं तु शंखप्रोक्तं पठेद् द्विजः ।
श्रद्दधानो ऽनसूयश्च पुण्यांल्लोकानवाप्नुयात् ॥
इति शंखकृतं धर्मशास्त्रं संपूर्णं ॥

[Mack. Coll.]

1339.

1749a. Foll. 78; size 8½ in. by 3 in.; legibly written in Devanāgarī, about the end of the 17th century; eight or nine lines in a page.

Vasishṭhasmṛiti, a compendium in ten adhyāyas, of religious duties enjoined on the votaries of *Vishṇu*, ascribed to *Vasishṭha*.

The work begins:

गुरुमिक्ष्वाकुवंशस्य वसिष्ठं ब्रह्मसंभवं ।
पप्रच्छुर्मुनयः सर्वे पराशरपुरोगमाः ॥
भगवन् भवता प्रोक्ता यज्ञदानव्रतादयः ।
वर्णाश्रमाणां कर्तव्यास्तथा राज्ञां महीभृतां ॥
अधुना श्रोतुमिच्छामो विप्राणां विष्णुसेविनां ।
कीदृग्विधाः प्रकर्तव्या नित्यनैमित्तिकाः क्रियाः ॥
वैष्णवानां मुनिश्रेष्ठ ब्रूहि सर्वमशेषतः ।
श्रीवसिष्ठ उवाच ।
शृणुध्वं मुनयः सर्वे सर्वधर्मं सनातनं ॥
वैष्णवानां च विप्राणां यद्यदाचरणं शुभं ॥
सर्गादौ ब्राह्मणाः सृष्टाः वैष्णवत्वेन चोदिताः ।
इतरे च त्रयो वर्णा ब्रह्मणा विष्णुसेविना ॥
तस्माच्च वैष्णवा विप्राः प्रकटा द्विजसत्तमाः ।
अवैष्णवत्वं विप्राणां महापातकसंमितं ॥
अवैष्णवाश्च ये विप्राः सर्वकर्मसु गर्हिताः ।
रौरवं नरकं प्राप्य चाण्डालीयोनिमाप्नुयुः ॥ ० ॥
वैष्णवत्वेन संसिद्धिं लभते नात्र संशयः ।
नारायणं परं ब्रह्म ब्राह्मणानां हि दैवतं ॥
सोमसूर्यादयो देवाः क्षत्रियाणां विशामपि ।
शूद्रादीनां तु रुद्राद्या अर्चनीयाः प्रयत्नतः ॥
यत्र रुद्राचनं प्रोक्तं पुराणेषु स्मृतिष्वपि ।
तदब्रह्मण्यविषयमेवमाह प्रजापतिः ॥

Adhyāyas II.–IV. treat of the *saṃskāras* ordained for *Vaishṇava brāhmaṇas*; A. V., of the duties of women; A. VI. and VII., of the propitiation (*ārādhana*) of *Vishṇu*; A. VIII., of *śrāddha*; A. IX., of *āśauca*; A. X., of the setting up and inauguration of statues of *Vishṇu*.

It ends:

प्रतिष्ठासु च कर्तव्यो विधिरेष उदाहृतः ।
गृहार्चनं च कर्तव्यं विधिं वक्ष्यामि सत्तमाः ॥
स्नापयेत्पञ्चगव्येन मन्त्रपूतजलेन च ।
मन्त्रेणावाहयेद्देवं परो (? l. परे) व्योम्नि स्थितं विभुं ॥

महाभागवतः स्पृष्ट्वा मन्त्ररत्नं जपेत्सुधीः ।
दद्यात्पुष्पाञ्जलिं पश्चात्तेनैव शतसंख्यया ॥
आज्यं तेनैव होतव्यमष्टोत्तरशतं ततः ।
उपचारैः समभ्यर्च्य नमस्कुर्याच्च भक्तितः ॥
वैष्णवान् भोजयेत्पश्चाद्दक्षिणाभिः प्रतोषयेत् ॥
इति वसिष्ठस्मृतौ दशमो ऽध्यायः समाप्तः ॥

This is one of the spurious sectarian codes. There are several other versified *smṛitis*, ascribed to *Vasishṭha*, for which cf. West and Bühler, Digest 3rd ed., pp. 28, 52; Burnell, Tanjore Cat., p. 127*a*. For the older *Vāsishṭha-Dharmaśāstra* see above, nos. 1251–54.

[H. T. Colebrooke.]

1340.

913a. Foll. 65; size 13¼ in. by 6 in.; large, modern Devanāgarī writing; ten lines in a page.

Vaishṇava-Dharmaśāstra (*Vishṇu-smṛiti*); Institutes of Law in 100 adhyāyas, which profess to have been taught by *Vishṇu* to his consort *Lakshmī*.

It begins:

ब्रह्मरात्रौ (० रात्र्यां other MSS.) व्यतीतायां विबुद्धे
[(प्रबुद्धे v. l.) पद्मसंभवे ।
विष्णुः सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलानुगां ॥

Prof. J. Jolly has published a critical edition of this work in the Bibliotheca Indica (1881), and an English translation, in the Sacred Books of the East, vol. vii. [H. T. Colebrooke.]

1341.

540. Foll. 72; size 9½ in. by 2½ in.; fairly written, in Devanāgarī, c. 1750 A.D.; seven lines in a page.

The same work.

One or two leaves have been lost at the end, the MS. breaking off shortly after the beginning of the 97th adhyāya.

[H. T. Colebrooke.]

1342.

915. Foll. 299; size 12½ in. by 5¾ in.; fairly written, in Devanāgarī, in the latter part of last century; fifteen lines in a page.

Vishṇu-smṛiti, with a commentary, entitled *Keśava-Vaijayantī*, composed, at Benares, in Samvat 1679 (1622 A.D.), by *Nanda Paṇḍita*, son of *Rāma Paṇḍita*.

The commentary begins:

श्रीवत्सांकितवक्षसः प्रणयिनो नित्यार्चने संविधान्
आधातुं निहितं गिरींद्रसुतयोत्संगे मणिं (? मणिं) धूर्जटेः ।
चूडाचुंबिकलंकपंकिलकलं चंद्रं मृणालध्वमाद्
आदातुं करमुत्क्षिपंतमसकृद्दृढिं चिरं भावये ॥ १ ॥ ०

Ninety-three introductory verses, the last but one of which runs thus:

काश्यां[:] कर्मौधिकारिप्रथितकुलमणिर्धर्मशास्त्रैकनिष्ठः
श्रीमा[श्रीम]न्महीपत्यविधवुधसुतानंतसूरेस्तनूजः ।
श्रीरामस्तस्य सूनुः प्रथितबहुकृतिर्धर्मशास्त्रेषु नंदो
व्याचष्टे केशवीयप्रणयपरवशो वैष्णवं धर्मशास्त्रं ॥ ९२ ॥

It ends:

वर्षे विक्रमभास्करस्य गणिते नंदाद्रिषड्भूमिभिः १६७९
पूर्णे कार्त्तिकमासि वृश्चिकगते भानौ वृषस्थे विधौ ।
काश्यां केशवनायकस्य नृपतेराज्ञामवाप्य स्मृतेर्
विष्णोर्व्याकृतिमाचकार विमलां श्रीनंदशर्मा सुधीः ॥ ७ ॥
इति श्रीमन्महाराजाधिराजश्रीवशिष्ठवंशावतंसश्रीकोडपनायकात्मजश्रीतम्मसानायकापरनामधेयश्रीकेशवनायकप्रोत्साहितश्रीवाराणशीवासिधर्मौधिकारिश्रीरामपंडितात्मजश्रीनंदपंडितकृतौ विष्णुस्मृतिविवृतिः श्रीमतो केशववैजयंतो समाप्ता ॥

According to V. N. Mandlik, *Vyavahāra Mayūkha*, p. lxii., *Nanda Paṇḍita* of Benares was descended from *Śrī Lakshmīdhara*, who originally resided at Bidar in Southern India, but subsequently went to live at Benares: 'from him *Nanda Paṇḍita* was sixth in descent (viz. *Śrī L.—Śrī Kṛishṇa—Mahīpati—Ananta—Rāma—Nanda P.*); and persons belonging to the ninth generation after *N. P.* are still flourishing in Upper India' (see complete genealogical chart). Thirteen works are there

attributed to *Nanda*, viz. 1. *Dattakamīmāṃsā* (no. 1539); 2. *Navarātrapradīpa;* 3. *Smṛitisindhu;* 4. *Harivaṃśavilāsa* (three sections: *dānakautuka, āhnikak.* and *saṃskārak.*); 5. *Bālabhūshā* (this comm. on 6., is by *Bālakṛishṇa*, acc. to Bik. Cat., p. 476); 6. *Tattvamuktāvalī;* 7. *Mādhavānanda-nāṭaka* (rather *kāvya*); 8. *Keśava-Vaijayantī;* 9. *Vidvanmanoharā* (on *Parāśarasmṛiti*, see no. 1301); 10. *Śrāddhakalpalatā* (no. 1730); 11. *Tīrthakalpalatā;* 12. *Kālanirṇayakautuka* (part of 3.); 13. *Kāśīprakāśa.*—*Govinda*, author of the *Jyotisha-Ratnasaṃgraha*, is said to have been *Nanda's* eldest brother.

[H. T. COLEBROOKE.]

1343–1345.

1543–1545. Foll. 219, 98 and 282 resp.; size 11 in. by 5 in.; good, modern Devanāgarī writing; eleven lines in a page.

Nanda Paṇḍita's Keśava-Vaijayantī.

Vol. I. contains adhyāyas 1–18; II., adhy. 19–32; III., adhy. 33–100.

[H. T. COLEBROOKE.]

1346, 1347.

1246, 1247. Foll. 1–187, 188–337 resp.; size 9½ in. by 4 in.; legibly written, in Devanāgarī, about 1750 A.D.; 10–12 lines in a page.

The same work.

Vol. I. terminates in the middle of the comment on adhy. 16, *sūtra* 3.

[H. T. COLEBROOKE.]

1348.

723d. Foll. 5; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

[*Laghu-*]*Vaishṇava-Dharmaśāstra*, or [*Laghu-*]*Vishṇu-smṛiti;* a treatise on *ācāra*, in 107–109 *ślokas*, here divided into five chapters.

I. ऋषिमेकाग्रमासीनं विष्णुं मतिमतां वरं ।
पप्रच्छुर्मुनयः सर्वे कलापग्रामवासिनः ॥ १ ॥
कृतयुगे ह्यपक्षीणे नष्टो धर्मः सनातनः ।
तेन वै शीर्यमाणेन धर्मेण परमार्थतः ॥ २ ॥
त्रेतायुगे तु संप्राप्ते कर्तव्यश्चास्य संग्रहः ।
यथा संप्राप्यते ऽस्माभिस्तत्त्वं नो वक्तुमर्हसि ॥ ३ ॥
वर्णाश्रमाणां यो धर्मो विशेषश्चैव यः कृतः ।
भेदस्तथैव तेषां यस्तत्त्वो ब्रूहि द्विजोत्तम ॥ ४ ॥
ऋषीणां समचित्तानां त्वमेव परमोत्तमः ।
धर्मस्येह समस्तस्य नान्यो वक्तास्ति सुव्रत ॥ ५ ॥
श्रुत्वा धर्मं च हृष्यामो यथावत्परिभाषितं ।
तस्माद्विद्धि द्विजश्रेष्ठ सर्वेकामा इमे द्विजाः ॥ ६ ॥
इत्युक्त ऋषिभिस्तैस्तु मुनिस्तु प्रीतमानसः ।
अनाद्यः श्रूयतां धर्मो वक्ष्यमाणो यथाक्रमात् ॥ ७ ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति तथापरः ।
एतेषां धर्मसारं यद्वक्ष्यमाणं निबोधत ॥ ८ ॥
ऋतावृतौ तु संयोगाद् ब्राह्मणो जायते स्वयं ।
तस्माद्विप्रस्तु संस्कारं गर्भादौ तु नियोजयेत् ॥ ९ ॥
जातकं कर्म कुर्यात्तु पुत्रे जाते तु वैदिकं ।
बहिर्निष्क्रमणं कुर्याद्धामकर्म दशोध्वतः ॥ १० ॥
षष्ठे मासे तु संप्राप्ते अन्नप्राशनमाचरेत् ।
तृतीये ऽब्दे तु संप्राप्ते केशकर्म च कारयेत् ॥ ११ ॥
सीमंतोन्नयनं कर्म न स्त्रीसंस्कार इष्यते ।
गर्भस्थैव तु संस्कारो गर्भे चैव प्रयोजयेत् ॥ १२ ॥ ०

II. अथातः संप्रवक्ष्यामि गृहिणां धर्ममुत्तमं ॥ २७ ॥
प्राजापत्यं पदस्थानं सम्यक्स्थानं निबोधत ।
सर्ववर्णैः समुत्थाय कृतशौचः समाहितः ॥ २८ ॥

III. गृहस्थो ब्रह्मचारी वा वनवासं यदा व्रजेत ।
चीरवल्कलधारी स्यादकृष्टं चाशयेन्मुनिः ॥ ४७ ॥

IV. ब्रह्मचारी गृहस्थो वा वानप्रस्थो ऽथ वा मुनिः ।
विरक्तः सर्वकामेभ्यः पारिव्रज्यं (A. B.) समाश्रयेत् ॥ ६२ ॥

V. राज्ञां पुण्यवतामाज्ञा त्रिवर्गपरिरक्षणं ।
रक्षमाणस्तु यो धर्मस्तत्त्वतस्तन्निबोधत ॥ ९५ ॥
तेजः सत्यं व्रते दीक्षा संग्रामेष्वपलायिता ।
दानमीश्वरभावश्च क्षात्रधर्मः प्रकीर्तितः ॥ ९६ ॥ ० - -
कुर्याच्छूद्रश्च शुश्रूषां विप्रक्षत्रविशां क्रमात् ।
कुर्यादितरयोर्वैश्यः क्षत्रियो ब्राह्मणस्य तु ॥ १०६ ॥

परिव्राजिस्यु (? °ज्या तु or °जिस्तु) संप्राप्तिर्ब्राह्मणस्य [विधीयते ।

आश्रमाणामयं धर्मो मया प्रोक्तः सनातनः ॥ १०७ ॥

यद्यत्र विदितं किंचिन्नदन्येभ्यो विनिश्चयेत् ॥ १०८ ॥

इति वैष्णवे धर्मशास्त्रे पंचमो ऽध्यायः ॥ इति विष्णुस्मृतिः समाप्ता ॥

For yet a third *Vishṇusmṛiti* see Calc. Dh. I., pp. 60–69; Burnell, Index Tanj. MSS., p. 127*a*.

[H. T. Colebrooke.]

1349.

2489k. Foll. 6; size 11 in. by 5¼ in.; fairly good, modern Devanāgarī writing; ten lines in a page.

The same work.

This rather incorrect MS. has 109 *ślokas*, not divided into chapters; and it differs considerably in its readings from the other MS.

It begins:

विष्णुमेकाग्रमासीनं श्रुतिस्मृतिविदां वरं ।
पप्रच्छुर्मुनयः सर्वे कलापग्रामवासिनः ॥ १ ॥
कृतयुगे ऽपक्षीणे तु प्रोक्त धर्मे(!) सनातनः ।
तेन वैश्यर्षयोहेन(!) धर्मो न प्रतिपादितः ॥ २ ॥ °

It ends:

कुर्याच्छूद्रस्तु शुश्रूषां ब्रह्मक्षत्रविशां क्रमात् ।
कुर्यादुत्तरयोर्वैश्यः क्षत्रियो ब्राह्मणस्य तु ॥ १०७ ॥
आश्रमास्तु त्रयः प्रोक्ता वैश्यराजन्ययोस्तथा ।
परिव्रज्याश्रमप्रति(!) ब्राह्मणस्यैव चोदिता ॥ १०८ ॥
आश्रमाणामयं धर्मो मया प्रोक्तः सनातनः ।
यदत्राविदितं किंचित् तदन्येभ्यो गमिष्यथः ॥ १०९ ॥

इति श्रीविष्णुप्रोक्तं लघुविष्णुधर्मशास्त्रं समाप्तं ॥ इति लघुविष्णुस्मृतिः समाप्ता ॥ [Gaikawar.]

1350.

69c. Foll. 37; size 10¾ in. by 3 in.; large, indifferent Devanāgarī writing of 1791 A.D.; four or five lines in a page.

Vyāsa-smṛiti, in four adhyāyas.

I. वाराणस्यां सुखासीनं वेदव्यासं तपोनिधिं ।
पप्रच्छुर्मुनयो ऽभ्येत्य धर्मान्वर्णव्यवस्थितान् ॥ १ ॥
[43 *ślokas*.

II. एवं स्नातकतां प्राप्तो द्वितीयाश्रमकांक्षया ।
प्रतीक्षेत विवाहार्थमनिंद्यान्वयसंभवां ॥ १ ॥
[56 *ślokas*.

III. नित्यं नैमित्तिकं काम्यं नैमित्तिकमतः परं ।
त्रिविधं कर्म वक्ष्यामि गृहस्थस्यावधार्यतां ॥ १ ॥
[75 *ślokas*.

IV. इति व्यासकृतं शास्त्रं धर्मसारसमुच्चयं ।
आश्रमे यानि पुण्यानि मोक्षधर्माश्रितानि च ॥ १ ॥
[72 *ślokas*.

The MS. follows closely the order of verses of the text in the Calc. Dh. II., pp. 321–342; but it has the following additional lines:

After p. 322, line 3 (° कुटुंबिनः ।) it reads:

एते चान्ये च बहवः शूद्रा भिन्नाः स्वकर्मभिः ॥ ११ ॥
चर्मकारो भटो भिल्लो रजकः पुल्कसो नटः ।

After p. 325, l. 17 (° दूषितम् ।) it inserts:

तावन्न दुष्टा दुष्टं च स्वार्थेभ्यो भेदयंश्च यत् ॥ ९ ॥

After p. 330, l. 4:

अहोऽयनुदिते (!) भानावित्येक उदिते रवौ ।
जपेदादित्यदेवत्यान्मंत्रान्मंत्रनियोगवित् ॥ ४ ॥

After ib. l. 19 (° फलमाप्नुयात्):

वेदेभ्यो ऽन्यत्र संतुष्टः स विप्रः शूद्रतामियात् ॥ १२ ॥

Before p. 338, l. 1:

क्रिमयः किं न जीवंति भक्षयंति परस्परं ।
परशोकाविरोधेन यो जीवति स जीवति ॥ २२ ॥

It ends:

पंक्तिभेदी वृथापाकी नित्यं ब्राह्मणनिंदकः ।
आदेशी वेदविक्रेता पंचैते ब्रह्मघातकाः ॥ ७१ ॥
इदं व्यासमतं नित्यमधेतव्यं प्रयत्नतः ।
एतदुक्ताचारवतः पतनं नैव विद्यते ॥ ७२ ॥

इति वेदव्यासप्रोक्ते धर्मशास्त्रे चतुर्थो ऽध्यायः ॥ व्यासस्मृतिः समाप्ता ॥ [H. T. Colebrooke.]

1351.

2489f. Foll. 5; size 11 in. by 5¼ in.; good, modern Devanāgarī writing; nine lines in a page.

Vyāsa-smṛiti. Adhyāya IV.

It begins:

इदं व्यासकृतं शास्त्रं धर्मसारसमुच्चयं ।
आश्रमे यानि धर्माणि मोक्षधर्मं शृणुष्व मे ॥ १ ॥ °

The MS., which is rather incorrect, counts 69 *ślokas*, but there is a lacuna extending from within *śloka* 32 to *śloka* 38.

It ends:

पंक्तिभेदी वृथापाकी नित्यं ब्राह्मणनिंदकः ।
आदेशी वेदविक्री च भवंते (!) ब्रह्मघातकाः ॥ ६८ ॥
सुवर्णहारको हर्ता दाता हर्ता च ते त्रयः ।
नरकान्न निवर्तंते यावदाहूतसंप्लवं ॥ ६९ ॥
इति श्रीवेदव्यासमुनिप्रणीतं धर्मशास्त्रं ॥ इति व्यासस्मृतिः ॥

[GAIKAWAR.]

1352.

3246b. Foll. 3*a*–6*a*; size 8¾ in. by 7½ in.; 4to.; coarse Indian paper; Telugu character; 18–21 lines in a page.

The same section of the *Vyāsa-smṛiti.*

It begins:

इदं व्यासकृतं शास्त्रं धर्मसारसमुच्चयं ।
आश्रमे यानि पुण्यानि मोक्षधर्मेष्वशेषतः ॥

It ends:

ऋणहर्ता भूमिहर्ता धान्यहर्ता च ते त्रयः ।
नरकान्न निवर्तंते यावदाभूतसंप्लवं ॥
इति व्यासकृतं धर्मशास्त्रं संपूर्णं ॥

[MACK. COLL.]

1353.

3247d. Foll. 6*b*–8*b*; size 10 in. by 7 in.; 4to; Telugu character; twenty-three lines in a page.

The same chapter of the *Vyāsa-smṛiti;* consisting of 64 *ślokas.*

Beginning and end as in no. 1352.

[MACK. COLL.]

1354.

3248d. Foll. 8*b*–11*a*; size 9½ in. by 7¾ in.; Telugu character; eighteen lines in a page.

The same portion of the *Vyāsa-smṛiti.*

Beginning and end as in no. 1352.

[MACK. COLL.]

1355.

3249d. Foll. 8*b*–11*a*; size 10 in. by 7¾ in.; Telugu character; twenty lines in a page.

Another copy of the same chapter of the *Vyāsa-smṛiti.*

Beginning and end as in no. 1352.

This and the two preceding MSS. were probably derived from the same original.

[MACK. COLL.]

1356.

3245c. Foll. 7*a*–10*b*; size 15¼ in. by 9¼ in.; folio; European paper; Telugu character; thirty-six lines in a page.

Vyāsa-smṛiti, in three adhyāyas.

This treatise corresponds to the *Laghu-Vyāsasaṃhitā* of the Calc. Dh. II., pp. 310–320, where, however, only two chapters are counted.

I. begins: ऋषय ऊचुः ।
अहन्यहनि कर्तव्यं ब्राह्मणानां (क्रमान्वितं) महामुने ।
तदाचक्ष्वाखिलं कर्म येन मुच्येत बंधनात् ॥
व्यास उवाच । विप्राः समाहितास्त्वद्य शृणुध्वं वदतो [मम ।
अहन्यहनि कर्तव्यं ब्राह्मणानां क्रमान्वितं ॥
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिंतयेत् ।
कायक्लेशांश्च तन्मूला[न्] वेदतत्त्वार्थमेव च ॥
उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः ।
क्षायान्नदोषु शुद्धासु शौचं कृत्वा यथाविधि ॥

II. अथागत्य गृहं विप्रः समाचम्य यथाविधि ।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसं ॥ °

III. ततः संध्यामुपासीत पूर्वोक्तविधिना ततः(? द्विजः) ।
आसीनस्तु जपेद् देवीं गायत्रीं पश्चिमां प्रति ॥ °

The last seven *ślokas* of the Calc. text.

Cf. Burnell, Tanjore Cat., p. 127*a*.

[MACK. COLL.]

1357.

913c. Foll. 15; size 13¼ in. by 6 in.; large, modern Devanāgarī writing; ten lines in a page.

[*Vṛiddha-*]*Śaṅkha-Dharmaśāstra*, in eighteen adhyāyas. It begins:

स्वयंभुवे नमस्कृत्य सृष्टिसंहारकारिणे ।
चातुर्वर्ण्यहितार्थाय शंखः शास्त्रमथाकरोत् ॥

This MS. has the same matter, in exactly the same order, as the text in the Calc. Dh. II., pp. 343–374; except that it makes the 10th adhyāya begin with X., *śl.* 2 of the ed. (*śl.* 1 being taken along with the 9th); and the 14th adhyāya with the 4th line of the chapter as edited (नमैदायां); and that it has the following additional lines:

After p. 347, l. 13:

सपिण्डीकरणं कार्यं कुलजस्य तथा भुवं ।
श्राद्धं द्वादशकं कृत्वा श्राद्धे प्राप्ते त्रयोदशे ॥

After p. 348, l. 16 (पतिपूजनात् ।):

न व्रतैर्नोपवासेन न यज्ञैश्च पृथग्विधैः ।
राजा स्वर्गमवाप्नोति प्रजानां परिपालनात् ॥

After adhy. viii., l. 4:

सप्तागारान् चरेद्भैक्ष्यं भिक्षितान्नान्विभक्षयेत् ।

After p. 354, l. 3 (० सर्वेशः ।):

इत्येवमुक्ता कर्तव्यं ततः संमार्जनं जले ।
आपो हि ष्ठेति तिसृभिर्यैरावदनुपूर्वशः ॥

After p. 360, l. 4 (० तिलोदकं ।):

हेम्ना तु सह यद्दत्तं क्षीरेण मधुना सह ।
तदप्यक्षयतां याति पितॄणां तु तिलोदकं ॥

After p. 361, l. 12 (० विनिवेदयेत् ।):

अन्यत्र वृक्षमूलेभ्यः पावकेभ्यश्च पण्डितः ।

After p. 370, l. 17 (० रङ्गावतारिणः ।):

चिकित्स[क]स्य शूद्रस्य तथा स्त्रीमृगजीविनः ।
षंडस्य कुलजायाश्च तथा बन्धनचारिणः ॥

There is also considerable difference of reading at the beginning of adhy. III., where the MS. reads:

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्यं च संध्योपासनमेव च ॥
स गुरुर्यैः क्रियां कृत्वा वेदमस्मै प्रयच्छति ।
भृतकाध्यापको यस्तु उपाध्यायः स उच्यते ॥
माता पिता गुरुश्चैव पूजनीयाः सदा नृणां ।
क्रियास्तस्याफलाः सर्वे यस्यैते नादृताश्चयः ॥
प्रयतः कल्यमुत्थाय ०

The MS. ends:

शंखप्रोक्तमिदं शास्त्रं यो ऽधीते प्रयतः सुधीः ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥

इति श्रीमन्महर्षिशिरोरत्नायमानत्रयीनितरांजेगीयमानमहाविद्यान्यकृताखंडलोपदेशधिषण-शंखविरचितं धर्मशास्त्रं समाप्तम् ॥

[H. T. Colebrooke.]

1358.

84c. Foll. 19; size 10¾ in. by 4¾ in.; good, modern Devanāgarī writing; nine lines in a page.

The same work, marked on fol. 1*a* *Vṛihat-Śaṅkhasmṛiti-dharmaśāstra*.

It begins: स्वयंभुवे ० शास्त्रमकल्पयत् ॥

It ends:

शंखप्रोक्तमिदं शास्त्रं योधीते द्विजपुंगवः ।
सर्वपापविनि[मु]क्तः स्वर्गलोके महीयते ॥ १५ ॥

इति शंखप्रोक्ते धर्मशास्त्रे अष्टादशोध्यायः ॥

Cf. Burnell, Index Tanj. MSS., p. 127*b* (*Vṛiddha-Śaṅkhasmṛiti*).

For a short recension of the *Likhita-smṛiti*, ascribed to *Śaṅkha* see above, nos. 1337, 1338.

[H. T. Colebrooke.]

1359.

2047d. Foll. 2; size 11 in. by 5 in.; fairly written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Śaṅkha-Likhita-smṛiti, in 30 *ślokas*.

It begins:

वासुदेवं नमस्कृत्य शंखस्य लिखितस्य च ।
धर्मशास्त्रं प्रवक्ष्यामि दधि चैव घृतं यथा ॥ १ ॥
वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः । [॥ २ ॥
ते सर्वे वृषभावे (r. वृषला) ज्ञेयाः प्राग्वेदा अपि द्विजाः
अकृते वैश्वदेवे तु ये भुंजंति द्विजातयः ।
वृथा ते तेन पाकेन काकयोनिं व्रजंति वै ॥ ३ ॥ ०

It ends:

मन्युप्रहरणा विप्राश्चक्रप्रह[र]णो हरिः ।
चक्रात्तीक्ष्णतरो मन्युस्तस्माद्विप्रान्न कोपयेत् ॥ २९ ॥
अग्निदग्धं प्ररोहेत सूर्यदग्धं तथैव च ।
दग्धस्तु संप्रहो[हे]त ब्रह्मशापहतो हतः ॥
इति शंखलिखितप्रोक्तं धर्मशास्त्रं ॥ शंखलिखितस्मृतिः समाप्ता ॥

See Burnell, Index Tanj. MSS., p. 127*b* (*Śaṅkhasmṛiti*). [GAIKAWAR.]

1360.

69e. Foll. 11; size $10\frac{3}{4}$ in. by 3 in.; fair Devanāgarī writing of 1791 A.D.; 5–7 lines in a page.

Vṛiddha-Śātātapa-smṛiti, a treatise on defilement and purification, in 97 *ślokas*.

It begins:

वृद्धशातातपप्रोक्तं स्मृतितंत्रविनिश्चयं ।
संक्षेपेण प्रवक्ष्यामि यावदर्थोपलब्धये ॥ १ ॥
मूत्ररेतःसमुत्सर्गे यो भुंजीत पिबेत वा ।
चिरात्तं तत्र कुर्वीत प्रायश्चित्तं विशुद्धये ॥ २ ॥
मूत्रं कृत्वा व्रजन् यस्तु स्मृतिभंशाज्जलं पिबेत् ।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति ॥ ३ ॥
भुंजानस्य तु विप्रस्य कदाचित्स्रवते गुदं ।
उच्छिष्टमशुचित्वं च तस्य शौचं कथं भवेत् ॥ ४ ॥
पूर्वं कृत्वा तु तच्छौचं पश्चात्स्नानं समाचरेत् ।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति ॥ ५ ॥
निगिरत्यदि मेहेत भुंक्ते वा मेहने कृते ।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति ॥ ६ ॥
यदा भोजनकाले तु अशुचिर्भवति द्विजः ।
भूमौ निक्षिप्य तं ग्रासं स्नात्वा शुद्धिमवाप्नुयात् ॥ ७ ॥
अशित्वा सर्वं वापि त्रिरात्रेण विशुध्यति ।
अज्ञानात्पिबते तोयं ब्राह्मणः शूद्रजातिषु ॥ ८ ॥ °

Up to *śloka* 12 this treatise shows great similarity to the *Yamasmṛiti* above, no. 1329.

It ends:

धात्रा विश्वं निर्मितं तु भूतग्रामानिमांस्तथा ।
कालः समस्तान्यचति कुर्यान्मोक्षे मनस्ततः ॥ ९५ ॥
विमुक्तविषयासंगः प्राणो हृदि निरुध्यते ।
यदायात्यमनोभावं तदा निर्वाणमिच्छति ॥ ९६ ॥
वृद्धशातातपो ह्येतदुक्तवानृषिसत्तमः ।
अध्येतव्यं प्रयत्नेन ब्राह्मणैः श्रेयईप्सुभिः ॥ ९७ ॥
इति वृद्धशातातपप्रोक्तं धर्मशास्त्रं समाप्तम् ॥

For another MS. (100 *ślokas*), see Burnell, Index Tanj. MSS., p. 127*b*; Rāj. Mitra, Notices, viii., p. 25.

[H. T. COLEBROOKE.]

1361.

2047a. Foll. 9; size 11 in. by 5 in.; fair Devanāgarī writing of about 1780 A.D.; ten lines in a page.

Śātātapa-smṛiti, a treatise on expiations and *ācāra*, in mixed prose and verse.

It begins: शातातपस्य महर्षेर्धर्मशास्त्रं व्याख्यामः ॥ ब्राह्मणं हत्वा शिरःकपालमादाय तीर्थीतरं संचरेदात्मनः पापकीर्तनं कुर्वन् द्वाद[शा]ब्दैर्विशुध्यति ॥ अश्वमेधं पश्यति तद्दर्शनाच्छुद्धो भवति ॥ सुरापस्य सुरापाने शुद्धिः स्यात् ॥ ब्राह्मणसुवर्णहरणे राजसंनिधानात् सोमपानेन शुद्धिः स्यात् ॥ गुरुदाराभिगामिनस्तप्तायसीपरिष्वंजनेनैव शुद्धिः ॥ एषां यो येन संबध्यते तस्य तदेव प्रायश्चित्तं भवति ॥ पावकीयं चतुर्थकालं संविशेत् ॥ °

Twenty precepts of this kind, followed by three *ślokas*:

अज्ञाताशी अयाजी च विप्रकीर्णो भवेद् द्विजः ।
न तारयति दातारं नात्मानं न परिग्रहं ॥ °

After which a few more rules: अथोपपातकान्याहुः ॥ अग्न्युत्सादी कन्यादूषी स्त्रीघाती गोघ्नः भ्रूद्रघाती कुमारघाती यस्तिव्यवहारी ये तेषां प्रायश्चित्तानि ॥ अग्न्युत्सादने कृच्छ्रं ॥ कन्यादूषणे अर्धपादं ॥ स्त्रीघाती षण्मासान्कृच्छ्रेण ॥ वृषणाभिघाते प्राजापत्यं ॥ गोघ्नस्त्रीन्मासान्प्राजापत्यं कुर्यात् ॥ गोमतीं च जपेद्विद्यां ॥ भ्रूद्रवधे तप्तकृच्छ्रेण शुध्यति ॥ आहस्यश्च दातारिवधे भ्रूद्रवदकामकृते (!) प्रायश्चित्तं समाचरेत् ॥ followed by 139 *ślokas*:

प्राणायामास्त्रयस्तस्य व्रतं प्राश्य विशुध्यति ।
विवाहयेन्न सगोत्रां समानप्रवरां तथा ॥
तस्याः संवंधे अतिकृच्छ्रे चरेद् द्विजः ।
य उद्वहेत्सगोत्रां दुहितरं चैव मातुलां ।
पितृभिः सह तुल्यः स्यात् स तु चांद्रायणं चरेत् ॥

नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं ।
नातिलोमां नालोमिकां न वा चाटां न पिंगलां ॥
[(Manu. 3, 8).

यस्यास्तु न भवेद् भ्राता ० ib. 11.

असपिंडा तु या मातुरसगोत्रा च या पितुः ।
सा विवाह्या द्विजातीनां दारकर्मणि मैथुने ॥ (ib. 5).

हंसस्वनां मेघवर्णां मधुपिंगललोचनां ।
तादृशीमुद्वहेत्कन्यां स चैल(r. चैव) सुखमृच्छति ॥

दाराग्निहोत्रसंयोगं ० ib. 171.

It ends:

अच्छिद्रमिति यद्वाक्यं वदंति क्षितिदेवताः ।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः सह ॥ १३८ ॥

शातातपमिति ख्यातं धर्मशास्त्रोत्तमोत्तमं ।
एतत् ज्ञात्वा द्विजः सम्यगयाति ब्रह्म सनातनं ॥ १३९ ॥

इति श्रीशातातपमहर्षिप्रोक्तं धर्मशास्त्रं संपूर्णं ॥ इति शातातपमहर्षिप्रोक्तस्मृतिः ॥ [GAIKAWAR.]

1362.

3245g. Foll. 22*a*–27*b*; size 15½ in. by 9½ in.; folio; European paper; Telugu character; 36 or 37 lines in a page.

Śātātapa-smṛiti, in twelve adhyāyas. A different treatise from the last, with which, however, it shows a few coincidences.

The MS. is extremely incorrect.

The chapters begin as follows:

I. *Mahā(pātāka)prāyaścitta:* ब्राह्मणो ब्राह्मणं हत्वा शिरःकपालमादाय तीर्थान्यनुचरेत् । आत्मनः पापसंकीर्णं कृत्वा द्वादशवर्षात्प्रमोहयति (!) । अथवा अश्वमेधं यक्ष्यति इति तस्य दशीनात्पूतो भवति ।

ब्राह्मणस्तु सुरापश्चात्(l. ०श्चेत्) कथंचिन्नानुमोहितः ।
अग्निवर्णां सुरां पीत्वा मृतः शुद्धिमवाप्नुयात् ॥

उपहृत्य सुवर्णं तु ब्राह्मणस्य तु तत्स्वयं ।
कश्चित् मुसलमादाय राजानं स विधाय तु ॥ ०

II. *Abhakshyabhakshaṇakathana:* अथातो ऽवकीर्णिप्रायश्चित्तं व्याख्यास्यामः ॥ ब्रह्मचारी यद्यवकीर्यते चतुर्थकालापगमे नक्तं भेक्षं(!) चरेदेव संवत्सरात् पूतो भवति । ०

III. *Upapātakaprāyaścittakathana:* अथ उपपातकानि न्युत्सादको [r. अग्नु०] [क]न्यादूषी स्त्रीघाती शूद्रघाती वृषलघाती गोघ्नः केन मारादारापत्य । त्यागी पतित । सव्यापहारियत्येषां (*sic*) प्रायश्चित्तमनुपादने (!) । कृच्छ्रशब्देन स्त्रीघाती षण्मासं शूद्रवधे सांतपनकृच्छ्रं ०

IV. *Himsāprāyaścittakathana:* अथ मूत्रपुरीषकरणे सचेलस्नानं महाव्याहृतिभिश्च होमो रजस्वलाभिश्चमैदशैने ०

V. *Vivāhaprakaraṇa:*

यो हि हित्वा विवाहाग्निं ग्रहस्तयति (? गृहस्थ इति) [मन्यते ।
अन्नं तस्य न भोक्तव्यं वृषापाको ह्यसंस्कृतः ॥
वृषापाकस्य भुंजानः प्रायश्चित्तं चरेद् द्विजः ।
प्राणायामांस्त्रिरभ्यस्य घृतं प्राश्य विशुध्यति ॥ ०

VI. *Vaiśvadevakathana:*

लौकिकैर्वैदिकैर्वापि भुंक्ते च्छिष्टे जले क्षितं (!) ।
वैश्वदेवं तु कर्तव्यं पंचसु (सू MS.) नावपन्नये (?) ॥ ०

VII. *Śrāddhakathana:*

नाष्टं (!) तु पितृश्राद्धं कर्म वैदिकमाचरेत् । ०

VIII. (? *Pitṛitarpaṇa*):

दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तु प्रकीर्तितं ।
अपराह्णे पितृणां तु यच्च दानं प्रशस्यते ॥

IX. *Bhojanavidhi:*

अतिथिर्यत्र नाश्नाति न तत् श्राद्धं प्रशस्यते ।
श्रुतवित्तविहीनैश्च भुक्तमश्रोत्रियैस्तु वा ॥

X. *Śunādashṭaprāyaścitta:*

गवां शृंगोदकस्नानं महानद्युपसंगमात् ।
समुद्रदर्शनाद्वापि श्वना दष्टः शुचिर्भवेत् ॥

XI. *Śaucakathana:* अथाशौचं ब्राह्मणस्य दशाहं द्वादशाहं क्षत्रियस्य अर्धमासं वैश्यस्य । ०

XII. *Acārakathana:*

अब्राह्मणस्तु षट् प्रोक्ता इति शातातपो ऽब्रवीत् ।
आद्यस्तु राजभृत्यः स्यात् द्वितीयः क्र[य]विक्रयी ॥

It ends:

अग्निकार्यस्तु कुर्वीत वाग्यतो नान्यमानसः ।
भूतयज्ञं तथा श्राद्धं नित्यकृदिति तर्पणं ॥

इति शातातपधर्मशास्त्रे आचारकथनं नाम द्वादशोध्यायः ॥ इति शातातपधर्मशास्त्रं समाप्तं ॥

For other MSS. see Burnell, Index Tanjore MSS., p. 127*b*.

[MACK. COLL.]

1363.

3246c. Foll. 6*a*–10*a*; size 8¾ in. by 7½ in.; coarse Indian paper; Telugu character; 17–20 lines in a page.

Śātātapa-Dharmaśāstra, another treatise assigned to the same sage.

It begins:

परमाह्लादरूपाय ब्रह्मविष्ण्वीशमूर्तये ।
नित्याय [च] नमस्तस्मै जगदुत्पत्तिहेतवे ॥
अथातः संप्रवक्ष्यामि शाश्वतं श्रुतमव्ययं ।
धर्मस्वरूपं संक्षेपाच्छातातपमनामयं ॥
ब्राह्मणस्तु कदाचिद्वै ज्ञात्वा पापं करोति चेत् ।
उपपातकं यदि भवेत्तस्य चांद्रायणं चरेत् ॥
क्षत्रियस्त्रिककृच्छ्रेण वैश्यश्च नवभिर्दिनैः ।
शूद्रो ब्राह्मणभक्त्या वै विशुद्धो नात्र संशयः ॥
पतिव्रता यदि स्त्री स्याद् दोषावेशो ऽपि नास्ति वै ।
तस्याः संपोषणात्पुंसां पुण्यं वृद्धिश्च जायते ॥
ब्राह्मणो ब्राह्मणीं हत्वा तत्कपालधरः स्वयं ।
सवैतोर्येषु च स्वायात्कथयन्दोषमात्मनः ॥

The treatise consists of 85 *ślokas*, ending thus:

वैश्यः पंचशतेनैव क्षत्रियस्त्रिशतेन च ।
सत्रिणां दीक्षितानां च यतीनां ब्रह्मचारिणां ॥
सूतकं तावदेतेषां नैशिकस्य स चैव हि ।
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ॥
आपद्यपि च कष्टायां सद्यः शौचं विधीयते ।
अभोज्यादपि तद्ग्राह्यं यच्च गोद्विगतं (!) पयः ॥
अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशंकितः ॥
इति शातातपकृतं धर्मशास्त्रं संपूर्णं ॥

[Mack. Coll.]

1364.

723c. Foll. 11; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

Karmavipāka, another treatise on expiations, in six adhyāyas, likewise assigned to the *Śātātapa-smṛiti*.

It begins:

प्रायश्चित्तविहीनानां महापातकिनां नृणां ।
नरकांते भवेज्जन्म चिह्नांकितशरीरिणां ॥

The text of this treatise is included in the Calc. Dh. II., pp. 435–455. The present MS. contains (with considerable variations of reading) the entire matter contained in the edition—in the same order (except as regards the last ten *ślokas*, where the order is somewhat different)—omitting only fourteen lines; viz.: p. 440, l. 22; p. 441, ll. 4, 5, 19; p. 442, ll. 6, 7; p. 454, ll. 10, 20–22; p. 455, ll. 4, 5, 12, 13. On the other hand, it has a considerable amount of matter, not contained in the edition, scattered over the whole work (but esp. in the 2nd chapter), and amounting altogether to 93 lines.

A. I. consists of 34 *ślokas*;—II., of 80, ending:

तदर्धार्धप्रमाणेन क्षत्रियादिष्वनुक्रमात् ।
क्षत्रियो मृगयायां च मृगान्निघ्न दुष्यति ॥ ७७ ॥
तस्य युद्धांगणगतानायुष्मांस्तान् प्रमापयेत् ।
गजादिकान्सप्तदश सप्तसप्तोत्तरान् क्रमात् ॥ ७८ ॥
गर्भपातकरी नारी स्वदेहे भोगलुब्धये ।
सप्तजन्मावधिं यावन्नरकांते [illegible]संतिका (!) ॥ ७९ ॥
तत्पातकविनाशाय बालं कुर्याद्धिरण्मयं ।
विधाय बालं वस्त्रेण प्रदेयं हेमसंयुतं ॥ ८० ॥

III., of 25 *ślokas*;—IV., of 36, beg.:

कुनखी नरकस्थांते ० चांद्रायणं चरेत् ॥ १ ॥

It ends: ० देयं च शक्तितः ॥ ३५ ॥

मापतिललोहहारी गजधर्मा प्रजायते ।
माषद्वयमयं दद्याद्धेम वै द्विपलान्वितं ॥ ३६ ॥

V., 49 *śl.*, ends: ० तत्तत्पुरुषसंगमात् ॥ ४७ ॥

आसुरी असती दासी चर्मकारी च नर्तकी ।
रजकीभिः समं भोगात् पतंति पितृभिः सह ॥ ४५ ॥
उपोष्यैकादशीं शुद्धां जागरे कारयेन्निशि ।
तस्य पापविशुद्ध्यर्थं दद्यादेकां पयस्विनीं ॥ ४९ ॥

VI., 49 *śl.*, beg.: अश्वशूकरकृमिद्रुमशृंगिशकटाहताः।०

It ends:

मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ।
एवं कृते विधाने तु विदध्यादूर्ध्वदैहिकं ॥ ४८ ॥
ततः प्रेतत्वनिर्मुक्ताः पितरस्तर्पितास्तथा ।
दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसंपदः ॥ ४९ ॥
इति श्रीकर्मविपाके अगतिप्रायश्चित्तं नाम षष्ठो ऽध्यायः ॥
इति शातातपस्मृतिः समाप्ता ॥

For another MS. of this treatise, see Aufrecht, Cat. Bodl., no. 641. According to a MS. described by Dr. Rāj. Mitra, Notices, ii., p. 4 (containing 87 adhyāyas, estimated at 2376 *ślokas*), these six chapters would seem to be only a small fragment (273 *ślokas* in this MS.) of an extensive work entitled *Karmavipāka*, and ascribed to *Śātātapa*.

[H. T. Colebrooke.]

1365.

723i. Foll. 10; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

Saṃvarta-smṛiti, in 227 *ślokas* (wrongly numbered 212). [A.]

It begins:

संवर्त्तमेकमासीनमात्मविद्यापरायणं ।
ऋषयस्तु समागम्य पप्रच्छुर्धर्मकांक्षिणः (पृच्छंति ० B) ॥

Calc. Dh. I., pp. 584–603.

It ends:

धर्मशास्त्रमिदं पुण्यं संवर्त्तेन तु भाषितं ।
अधीत्य ब्राह्मणो गच्छेद् ब्रह्मणः सत्र शाश्वतं ॥
इति श्रीसंवर्त्तेन [प्रोक्तं] धर्मशास्त्रं ॥ इदं लिखितं संपूर्णमस्तु ॥

[H. T. Colebrooke.]

1366.

2489b. Foll. 10; size 11 in. by 5¼ in.; good, clear Devanāgarī writing of about 1780 A.D.; ten lines in a page.

Saṃvarta-smṛiti, in 210 *ślokas*. [B.]

Beginning and end as above. This MS. omits *ślokas* 9, 12, 34, 35*a* (of the three lines), 47*a* (do), 57, 61*b*, 62, 63, 64*a*, 74, 77–79, 90, 93, 95*a*, 104*b*, 105*a*, 114*b*, 117*a*, 119*a*, 122*b*, 123*a* (of three), 124, 154, 155, 200*b*, 201*a*, 206*b*, 215*b* of the Calc. Dh.; but it inserts two *ślokas* of its own after 197 and 204 resp., viz.:

पतिता[द्] द्रव्यमादत्ते भुंक्ते वा ब्राह्मणो यदि ।
कृत्वा तस्य समुत्सर्गं अतिकृच्छ्रं समाचरेत् ॥
अयने विषुवे चैव व्यतिपाते दिनक्षये ।
चंद्रसूर्यग्रहे चैव दत्तं भवति चाक्षयं ॥

Colophon: इति श्रीसंवर्त्तप्रोक्तं धर्मशास्त्रं समाप्तं ॥ संवर्त्तस्मृतिः समाप्ता ॥ [Gaikawar.]

1367.

3245h. Foll. 27*b*–29*b*; size 15½ in. by 9½ in.; folio; European paper; Telugu character; thirty-four lines in a page.

Saṃvarta-smṛiti. [C.]

Beginning as above. This text differs considerably from the printed text.

It consists of at least two adhyāyas, only the first of which (*brahmacārikathanam*) is however complete, the MS. terminating abruptly at the bottom of the last page. The MS. is very far from being correct.

The first seven *ślokas* are on the whole the same as in the Calc. Dh. It then proceeds:

पौर्वोत्तराभिमुखं (!) वा अपरोत्तरदिङ्मुखः ।
साक्षसूत्राञ्जलिः (?) संध्यायोरुदितमिष्यतोः ॥
अग्निकार्यं च कुर्वीत ० । ततो ऽधीयीत वेदं च ० ॥

उपसंग्रहणं कुर्याद् गुरोः पूर्वं तु पादयोः ।
ऋचा वा यदि वार्धर्चं पादं वा यदि वाक्षरं ॥
सकाशाद्यस्य गृह्णाति नियतं तस्य गौरवं ।
प्रणवं प्राक् प्रयुंजीत व्याहृतीस्तदनंतरं ॥
सावित्रीं चानुपूर्वेण ततो वृत्तांतमारभेत् ।
न चादावेव कर्तव्यं किंचन प्राकृतं वचः ॥
भाषणे तु गुणः (l. पुनः) कुर्यात् प्राणायामं विचक्षणः ।
हस्तौ तु संयुतौ धार्यौ जानुभ्यामुपरि स्थितौ ॥ ०

[39 *ślokas*.

A. II. begins (cf. Dh., *śl.* 35 seq.):

अतः परं समावृत्तः सवैनामुद्दहेत् (l. सवर्णामुद्वहेत्) स्त्रियं।
कुले महति संभूतां लक्षणैश्च समन्वितां ॥
ब्राह्मणेन विवाहेन शीलरूपसमन्वितां।
पंचयज्ञविधानं च कुर्यादहरहर्द्विजः ॥ ०

34½ *ślokas*, ending thus (Dh., *śl.* 66):

अष्टवर्षा भवेत्कन्या (!) नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति।
मासि — [Mack. Coll.]

1368.

3249b. Foll. 4*b*–5*b*; size 10 in. by 7¾ in.; Telugu character; 19 or 20 lines in a page.

Saptarshisammata-smriti, in 36 *ślokas* [A].

The three MSS. of this treatise were probably derived from the same original, or perhaps the other two were copied from the present MS.

It runs as follows:

प्रभाते मैथुने चैव प्रस्रावे दंतधावने।
स्नाने भोजनकाले च मौनं षट्सु विधीयते ॥ १ ॥
छर्दिते ऽभ्युदिते सूर्ये श्मश्रुकर्मणि मैथुने।
दुःस्वप्ने दुर्जनस्पर्शे स्नानं षट्सु विधीयते ॥ २ ॥
गंगायां भास्करक्षेत्रे मातापित्रोर्मृते ऽहनि।
आधाने यज्ञकाले च पापं (? मौनं) षट्सु विधीयते ॥ ३ ॥
स्नाने तु वरुणः शक्तिं जुह्वतो ऽग्निः श्रियं हरेत्।
भुंजतो मृत्युरायुष्यं तस्मान्मौनं समाचरेत् ॥ ४ ॥
ब्राह्मणं स्नातमायांतं सह गच्छंति देवताः।
पितरस्तत्र गच्छंति वायुभूता जलार्थिनः ॥ ५ ॥
अवगाहेज्जले नग्नो वस्त्रं यत्नु परोद्धृतं।
क्रुद्धाः स्नानाद्विवर्तंते देवता ऋषिभिः सह ॥ ६ ॥
स्नानकाले तु यो मूढो भक्षयेद्दंतधावनं।
पितृयज्ञेषु यच्छ्राद्धं निराशाः पितरो गताः ॥ ७ ॥
देवतर्षिपितॄणां च तर्पयेज्जलमध्यतः।
प्रयतः संस्थितानां च भूमौ दद्याज्जलांजलिं ॥ ८ ॥
हस्तौ तु युग्मं कृत्वा तु पूरयेदुदकांजलिं।
गोःशृंगमात्रमुद्धृत्य जलमध्ये तु निक्षिपेत् ॥ ९ ॥
जलस्थस्य जले शुद्धिर्बहिःस्थस्य बहिः शुचिः।
बहिरंतस्थ आचम्य उभयत्र शुचिर्भवेत् ॥ १० ॥
इति ° मंडपदेवकादिप्रतिष्ठा fol. 83*b*; ° देवकोत्थापनादि 84*b*; ° नववधूगृहगमनविधिः 85*a*, etc.

This portion ends: इति प्रयोगरत्ने ऽकैविवाहः ॥ see above, no. 471 (MS. 2794, fol. 118).

[H. T. COLEBROOKE.]

1758.

178. Foll. 199; size 12½ in. by 4 in.; fair Devanāgarī writing, of 1806 A.D.; ten lines in a page.

Śāntiratna, or *Śāntikamalākara*, another treatise on lustrations, and the means of averting evil omens, by *Kamalākara Bhaṭṭa*, (second) son of *Rāmakṛishṇa Bhaṭṭa*.

It begins:

नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरसंज्ञेन प्रोच्यंते शांतयः क्रमात् ॥

तत्र । एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमाम् ॥

इति याज्ञवल्क्येन सर्वकर्मांगत्वोक्तेर्विनायकशांतिरुच्यते । ० इति ० विनायकशांतिः fol. 7*a*; इति ० सर्वकर्मस्वग्निनिर्णयः । अथ सर्वशांतिकप्रकृतित्वाद्धयज्ञः 10*b*; इति ० शतमुखादिकोटिहोमः 29*b*; इति ० नवग्रहयज्ञः । अथ प्रसवशांतयः 35*b*; इति गंडांतशांतिः 39*a*; इति ० कृष्णचतुर्दशीशांतिः 41*b*; इति सिनीवालीकुहूशांतिः 43*b*; इति ० दर्शशांतिः ॥ इति तिथिशांतयः ॥ अथ नक्षत्रशांतयः । 45*a*; इति ० ज्येष्ठाशांतिः 47*a*; इति ० मूलशांतिप्रयोगः 58*a*; इति ० आश्लेषाशांतिः 64*a*; इति ० प्रसवशांतिः 64*b*; इति ० एकनक्षत्रजननशांतिः 64*b*; इति ० व्यतीपातादिशांतिः । अथ ग्रहणशांतिः 96*a*;—इति ० ज्वरोत्पत्तिनक्षत्रशांतयः ॥ अथ रविशांतिः 120*a*; इत्यंगारकशांतिः 120*b*; इति बुधशांतिः 121*a*, etc.; इति ० अद्भुतसामान्यशांतिः । अथ नानोत्पातशांतयः । 133*a*;—इति ० रुद्रविधानं समाप्तं । अथ वेदपारायणं 155*a*; इति वास्तुशांतिः । अथास्मत्पितृकृतो वास्तुशांतिप्रयोगः 166*a*; इति श्रीमद्विद्वद्वंद्यपादपद्मश्रीभट्टनारायणसूरिसूनुभट्टरामकृष्णविरचितः पौराणवास्तुप्रयोगः 171*b*; इति ० अर्कविवाहः 178*b*; इति ० रामकृष्णभट्टकृतो रुद्रस्नानविधिः 183*b*.

It ends:

श्रीमन्नारायणाख्यात्तमजनि विबुधो रामकृष्णाभिधानस्
तत्सूनुः सर्वविद्यांबुधिनिजचुलकीकारतः कुंभजन्मा ।
दृष्ट्वा नानानिबंधान् व्यरचयदतुलं ग्रंथसंज्ञाकराख्यः
पित्रोः पादाब्जभृंगो रघुपतिपदयोः स्वश्रमं प्रार्थयच्च ॥
[(*r.* संश्रयं प्राप्य यत्नात्)

इति शतचंडीसहस्रचंडीप्रयोगः ॥ (Rāj. Mitra, Notices, V., p. 270).

यो भाट्टतंत्रगहनार्णवकर्णधारः
शास्त्रांतरेषु निखिलेष्वपि मर्मभेत्ता ।
यो ऽत्र श्रमो ऽस्ति विहितः कमलाकरेण
प्रीतो ऽमुनास्तु स कृती बुधरामकृष्णः ॥

इति श्रीमत्पदवाक्यप्रमाणपारीणरामेश्वरभट्टसूरिसूनुनारायणभट्टसुतमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृतं शांतिरत्नं समाप्तं ॥

Foll. 68–95, written by a different hand, have been inserted there, but apparently belong to some other part of the work.

For another MS. of the work, see Bikāner Cat., p. 455; for a *Śāntiratnākara*, by the same author (probably the same work), see Burnell, Tanjore MSS., p. 138*b*.

The author wrote his *Nirṇayasindhu* in 1611–12 A.D. [H. T. Colebrooke.]

1759.

160b. Foll. 206; size 12 in. by 4½ in.; legibly written, in Devanāgarī, in 1801 A.D.; ten lines in a page.

The same work. [H. T. Colebrooke.]

1760.

917. Foll. 80; size 12½ in. by 4 in.; very fair, modern Bengalī handwriting; seven lines in a page.

Śāntikatattvāmṛita, a manual of directions for averting evil omens and propitiating astral influences, by *Nārāyaṇa Śarman*.

It begins:

नत्वा गोपीकान्तं मत्वा च विविध[वि]बुधवाक्यानि ।
श्रीनारायणशर्मा शान्तिकतत्त्वामृतं तनुते ॥
अद्भुतसिन्धुप्रमुखे तन्त्रमूले पुराणादौ ।
नानास्थाने ये ऽर्थास्ते ऽस्मिन् ग्रन्थे समासेन ॥

तत्र शान्तिलक्षणमाह स्मृतिः । ०

It ends: धेनुं सुवर्णं च दक्षिणां दद्यादित्यर्थः ॥ इति गणेशशान्तिपरिच्छेदः ॥ and by a different hand: इति श्रीनारायणशर्मकृतं शान्तिकतत्त्वामृतं समाप्तं ॥

See Rāj. Mitra, Notices, II., p. 9; VII., p. 233. [H. T. Colebrooke.]

1761.

665a. Foll. 1–18; 4to.; size 11½ in. by 9 in.; European paper; fairly written, in Devanāgarī; fifteen lines in a page.

Mahāśānti, a treatise on expiatory and propitiatory rites, in two adhyāyas of 18 and 25 sections resp.

It begins: ओं नमः श्रीवेदब्रह्मणे । श्रीहरिः ओं ॥

महाशांतिं प्रवक्ष्यामि यां प्राप्य महतीं श्रियं ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वाप्युपसर्जति ॥
ब्राह्मणः सर्वकामार्थी क्षत्रियः पृथिवीजयं ।
सर्वतस्तु समृद्धिं च वैश्यः समधिगच्छति ॥
दिव्यं वा पार्थिवं वापि क्षांतरिक्षमथापि वा ।
महाशांतिः प्रशमयत्यन्द्वा भयमुच्छ्रितं ॥

Chapter II. begins: अथ नक्षत्राणामुपाचारं वक्ष्यामो हतवासाग्नेः(? अहतवासा अग्नेः) पुरस्तादहतेन वस्त्रेणोदग्दशेनात्मन्यैवसाय कृत्तिकादीन्यज्ञायावाहयेदावाहयिष्यामि °

It ends:

समाप्तेयं महाशांतिः प्रेमानंदलिपीकृता ।
प्रतापोद्दंडमार्त्तंडकोलवुरुक्प्रभोः कृते ॥

For the first part of this treatise see Weber, Cat. Berl., no. 1249. [H. T. COLEBROOKE.]

1762.

1730a. Foll. 44; size 8½ in. by 4 in.; indifferent Devanāgarī writing; nine lines in a page.

[*Navagraha-*] *Śāntipaddhati*, a manual of directions for the propitiation of the nine planets, according to the *Sāman* ritual, by *Śivarāma*, son of *Viśrāma*.

It begins:

प्रणम्य तातं विश्रामं विघ्नेशं जगदंबिकां ।
ग्रहशांतिविधिं वक्ष्ये सामगानां हिताय वै ॥

Then follows a lacuna, space being left for some three or four lines; after which it proceeds:

गर्भाधानादिविवाहांतसंस्कारकर्मसु क्रियमाणो नैमित्तिकः । संपदादिफलोद्देशेन क्रियमाणः काम्यः ॥ तत्र नित्ये नैमित्तिके च न विहितकालनिषिद्धकालाद्यपेक्षा । काम्ये तु सर्वांगोपेतस्यैव फलवत्त्वाद्विहिते एव काले ग्रनुष्ठानं । तस्मात्काम्यस्तु ज्योतिर्विदादिष्टे शुभे ऽहि कर्तव्यः । काम्ये ग्रहयज्ञे मंडपकुंडादि यथोक्तमेव सर्वं कार्यं ॥ इति परिभाषा ॥ अथ कर्मक्रमः ॥ °

इति गणपतिपूजा fol. 3*b*; ऋत्विग्वरणं 6*b*; स्वस्तिवाचनं 7*a*; कौतुकबंधः 7*b*; अग्निस्थापनं 10*b*; °ग्रहाणां स्थापनं 18*b*, etc.

It ends: चतुर्भिश्चेत्यग्निं प्रणम्य यथाविभवं ब्राह्मणान्संपूज्य इष्टाचेन संभोज्य दीनान्धकृपणेभ्यो यथाविभवमन्नादि दत्त्वा इष्टैर्बंधुभिश्च परिवृतः स्वयं भुक्त्वा आत्मानं कृतार्थं मन्वीत ॥

इति विद्वन्मुकुटमाणिक्यनीराजितचरणकमलशुक्लश्रीविश्वात्मजशिवरामविरचिता नवग्रहाणामयुताहुतिहोमात्मिका शांतिपद्धतिः समाप्ता ॥ सं° १८०६ वर्षे फाल्गुणवदि ७ मंदे लि° त्रा° आशारामेण ॥

For the same author's *Chandogānīyāhnika*, see above, no. 455. [H. T. COLEBROOKE.]

1763.

1460. Foll. 409; size 8½ in. by 4½ in.; written, in Devanāgarī, by different hands, in the (16th or) 17th century; 9–15 lines in a page.

Mahārṇava, a comprehensive work on expiations for removing and obviating diseases and evil influences resulting from deeds in a former existence (*karmavipāka*); compiled by *Bhaṭṭa Viśveśvara*, son of *Peṭṭibhaṭṭa*, under the auspices of *Māndhātṛi*, younger son of *Rājā Śrī-Madanapāla*, and brother of *Pṛithvīmalla* (author of *Śiśurakshāratna*).

The work begins:

नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥ १ ॥
प्रवालाद्रिप्रस्पर्धुतिनिचयपर्यायवपुषे ° ॥ २ ॥

Cf. *Smṛitikaumudī*, Aufrecht, Cat. Bodl., no. 653, verses 3–12.

यदिंदिरानाथपुरंदराद्यैराराधितं ° ॥ ३ ॥
प्रकृष्टचलकुंडलस्तवकघृष्टगंडस्थलं ° ॥ ४ ॥
कांते कृतागसि ° ॥ ५ ॥
आसीदसीमगुणटाककुलांबुराशाव् °
श्रीरत्नपालनृपतिर्भुवनैकरत्नं ॥ ६ ॥
तस्यानुजो भरहपाल इति प्रसिद्धः ° ॥ ७ ॥
सुतो ऽस्य जातः सुकृतोन्नतस्य °
नाम्ना हरिश्चंद्र इति व्यधत्त ॥ ८ ॥

तस्यात्मजो ऽभूदतुलप्रतापः साधारणो भूमिपतिर्वदान्यः। ०
बंधच्छिदां विरुदकीर्तिः ० ॥ १० ॥ [॥ ९ ॥
अस्यात्मजः श्रीमदनेन नाम्ना ० ॥ ११ ॥
यः कूपानारामान् ० ॥ १२ ॥ Aufr., Cat. Bodl.,
परिशीलयता कलाकलापं [no. 651, v. 17.
विदधानेन च भूरिशः प्रबंधान्।
मदनेन महीभृताथ येन
प्रथिता नूतनभोजराजकीर्तिः ॥ १३ ॥
पुत्रेषु सत्स्वपि कलत्रयुगे ऽथ तस्य
पुत्रौ जगत्त्रयविसृत्वरकीर्तिपूरौ।
जातौ प्रियावतितरां प्रथमप्रसूतौ
नीतौ महोन्नतिमनल्पगुणैर्विनीतौ ॥ १४ ॥
उदारशीलौ सुमनोविलास-
मनोज्ञवृंदावनकेलिलोलौ।
यशोदयावर्धितमंगलांगौ
यौ रामकृष्णाविव संप्रतीतौ ॥ १५ ॥
यच्छैशवानुकरणं न युवा न वृद्धः
शक्नोति कर्तुमपरः श्रुतसद्गुणो ऽपि।
दानं निदानमखिलार्थिजनार्थसिद्धेः
कीर्तिर्दिगंतविततता च यतस्तदीया ॥ १६ ॥
अप्रतिमल्लः पृथिव्यां पृथुमल्लस्तयोरभूज्ज्येष्ठः।
अपरो मांधातृगुणैर्मांधाता गीयते जगति ॥ १७ ॥
सो ऽयं सुकृतविधाता रिपुकुलजेता तनोति मांधाता।
विद्वन्मुखेन मतिमान् सत्कृतिरत्नं महाणीवं नाम ॥ १८ ॥
श्रुतिस्मृतिपुराणानि समालोक्य यथामति। [१९ ॥
निबध्यते (विरच्यते C) समासेन निबंधो ऽयं महाणीवः ॥

[Here the present MS. (A) inserts the following five verses (some of which occur again at the end of some chapters), and a short prose section :

पेहिभट्टात्मजः(!) श्रीमान् भट्टविश्वेश्वरः सुधीः।
महाणीवाभिधं स्मार्तं निबंधं कुरुते कृती ॥ २० ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परा* शीलं श्राव्यं जगति सृजवस्ते कतिपये।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमियाद्
इयं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥ २१ ॥

माता पुण्यचरित्रकीर्तिविभवा यस्यांबिका नामतः
शाकल्यापरमूर्तिरार्यचरितः श्रीपेहिभट्टः(!) पिता।
सो ऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
वेदे स्मार्तमते नये च सपदे वाक्ये कृती वर्धते ॥ २२ ॥
दुष्कर्मपाकजनितामयकर्षितानां
सत्कर्मशर्मकरमित्युदितं मुनींद्रैः।
तत्सांगजातमितरोक्तिविधानपथ्यं
वक्ष्यामि रोगनिखिलार्त्तिनिबर्हणाय ॥ २३ ॥
एनोविपाकः परतः कीर्त्यते कालनिर्णयः।
कृत्यं च हायनस्येति निबंधे ऽस्मिन्ननुक्रमात् ॥ २४ ॥

then follows a short passage : ननु कथं कर्मविपाककालनिर्णयवार्धिकृत्यानां पौर्वापर्यं। ० ending

इति पेहिभट्टात्मजभट्टविश्वेश्वरविरचिते महाणीवाख्ये कर्मविपाके संगतिः समाप्ता ॥ अथ वक्ष्यमाणसकल ०]

तत्र तावद्वक्ष्यमाणसकलकर्मोपयोगित्वेन कर्मविपाकरूपरोगादिनिवृत्त्यर्थं प्रायश्चित्तादेरवश्यकर्तव्यता प्रतिपाद्यते। तद्यथा ०

The work consists of forty chapters, or waves (*taraṅga*), the first seven of which (ending fol. 235*b*) treat of *prāyaścitta*, as a religious observance for the improvement of a man's future prospects; while the remaining chapters deal with *karmavipāka* more especially, and aim at "taking away the gripe of a particular malady." While the former section draws its prayers and invocations largely from the *Veda*, particularly the *Yajurveda; Purāṇas* and *Tantras* have supplied most of the materials for the second section. The authority most frequently laid under contribution is the *Śātātapīya Karmavipāka*. The following may serve as a specimen of the endings of chapters, and the subjects treated :

महाणीवाख्ये महति प्रबंधे
मांधातृनाम्नो मदनात्मजस्य।
सत्कर्मरत्नौघनिदानमाद्यस्
तुंगस्तरंगो ऽयमगादगाधः ॥ fol. 6*a*;

इति शातातपीयकर्मविपाकोक्तपरिभाषा 9*a*; इति जमदग्निप्रोक्तः कूष्मांडहोमविधिः 11*a*; इति बौधायनोक्तः कूष्मांडहोमविधिः 12*a*; आज्यहोमविनियोगः 19*a*; इति कूष्मां-

* Thus also A, B, C at the end; see *Madanapārijāta*, ed., Bibl. Ind., p. 128.

होमानुष्ठानक्रमः ॥ ० द्वितीयस्तरंगः ॥ 27*b*; इत्यापस्तंबीयो गणहोमविधिः 29*a*; चरुहोमविनियोगः 37*a*; इति० तृतीयस्तरंगः 42*a*; इत्याश्वलायनघोषशांतिः 52*b*; इति तैत्तिरीयघोषशांतिः 75*a*, etc. Up to fol. 50, and on foll. 73–75, the *mantras* are accented.

The chapter on *vināyakaśānti*, referred to in the author's *Smṛitikaumudī* (Aufrecht, Cat., p. 277*a*), is found on foll. 155*a*–160*b* of the present MS.

The last few leaves of the MS. have been partly restored by a more modern hand.

It ends: इति मेषग्रहहरणं ॥

मतिर्येषां शास्त्रे ० see above ॥ १ ॥

कविराधुनिकश्चिरन्तनो वा
न विशेषः क्वचिदस्ति सज्जनानां ।
इयतैव जितं मया यदेषाम्
अतिलोकेषु गुणेषु पक्षपातः ॥ २ ॥

इति श्रीपंडितपारिजातकभट्टारमल्लेत्यादिविरुदराजीविराजमानश्रीमदनपालपुत्रस्य मांधातृनिबंधे महाणीवाभिधाने कर्मविपाके ग्रहप्रकरणं समाप्तं ॥ समाप्तश्च महाणीवनामनिबंधः ॥

[H. T. Colebrooke.]

1764.

2152. Foll. 404; size 11 in. by 5 in.; good, large Devanāgarī writing, of about 1750 A.D.; ten lines in a page.

The same work [B].

This copy ends, foll. 395*b*-396*a*: इति मेषग्रहहरं ॥

मतिर्येषां ० ॥ १ ॥

महाणीवाख्ये महिते प्रबंधे
मांधातृनाम्नो मदनात्मजस्य ।
सत्कर्मरत्नावलिभृद्य (!) चत्वा-
रिंशत्तरंगो ऽयमगादगाधः ॥ २ ॥

समाप्तो ऽयं महाणीवनामा निबंधः ॥

Then follow eight leaves, containing a list of contents, written in triple columns.

[Gaikawar.]

1765.

3251. Foll. 410; size 7¾ in. by 6¼ in.; written, in the Śārada character, on birch bark, by two different hands; 15–17 lines in a page.

The same work [C].

The first leaf is missing, the second leaf beginning with the last *pāda* of verse 4 (प्रकृष्टचल ०) of the introduction, viz. महः किमपि मोहनं कपटशैशवं -- this leaf, as well as the next, is however sadly injured through the bark having peeled off.

A facsimile of one of the pages of this MS. has been published in the Palæographical Society's Oriental Series, part IV., with a descriptive account by Dr. Haas. The writing material used being of a very delicate nature, the MS. has to be handled with extreme care. It is wrapped in a plain case of limp leather, stamped with an ornamental edging.

The MS. ends on fol. 401*a* with the same two *ślokas* as MS. A, but the second is slightly defective; whilst of the colophon the copyist only wrote इति श्रीपंडितः; which is followed by an *anukramaṇikā* to the work.

Several lacunæ occur in the body of the work, esp. one extending from fol. 149*b* to 160*a*.

[G. Bühler.]

1766.

201. Foll. 99; size 10¾ in. by 4¼ in.; fairly good Devanāgarī writing, of 1639 A.D.; ten lines in a page.

Karmavipākasāra, a digest of directions for the expiation and removal of the evils resulting from sins in a former existence, especially maladies of all kinds, by *Dinakara*, son of *Rāmakṛishṇa* and *Umā*, and grandson of *Nārāyaṇa Bhaṭṭa*. It begins:

प्रासूतोमा प्रसूयै तनयमिह पिता रामकृष्णश्च सो ऽयं
प्रायश्चित्तेषु सारं दिनकरविबुधः शांतिकानां च सारं ।

कृत्वाथो कर्मपाकेष्वखिलबुधमुदे सारमेतं तनोमि
श्रीरामांघ्रिप्रभावादयमपि भजतां ख्यातिमुच्चैरवाप्तां॥१॥
ग्रंथे कर्मविपाकीये ये मयार्थो निरूपिताः।
तेषामादौ सुबोधाय क्रियते ऽनुक्रमः स्फुटः॥ २॥
प्रारब्धनाशो दानादेः प्रायश्चित्तैः समुच्चयः।
रोगाणां तारतम्येन द्वादशाब्दतदर्धकं॥ ०

This *anukramaṇikā* consists of 50 *ślokas*, ending thus:

दारिद्र्यहारि धनदं मूर्तिदानं ततः परं।
श्रीसूक्तस्य विधिस्तद्वद् रत्नदानं समृद्धिदं॥

नन्वनिष्टहरत्वाविशेषाच्छांतिककर्मविपाकयोः को भेदः। उच्यते। भाव्यनिवारकर्म विपाकत्वं। कर्मविपाकशब्दश्च कर्मणां विशेषेण पचनमिति व्युत्पत्त्या व्याध्यादिषु मुख्यः। तद्विपाका जात्यायुर्भोगा इति पातंजलसूत्रात्। तद्विवर्तककर्मसु लाक्षणिकः।

It ends: इति श्रीसूक्तं हेमाद्रौ संवर्तः॥

समुद्रजानि रत्नानि नरो विगतकल्मषः।
दत्त्वा विप्राय महते प्राप्नोति महतीं श्रियं॥

श्रीरामेश्वरसूरिसूनुरुदभूद्यो भट्टनारायणः
क्ष्मोणीपंडितमानखंडनजयी श्रीरामकृष्णस्ततः।
मीमांसानयतत्त्वविद् दिनकरस्तस्मादभूत्तत्कृतिः
सेयं कर्मविपाकसारविषया रामाय दद्यान्मुदं॥

इति श्रीमद्रामेश्वरसूरिसूनुश्रीमन्नारायणसुतश्रीमद्रामकृष्णसुतदिनकरकृतः कर्मविपाकसारः समाप्तः॥ संवत् १६९६ समये वैशाखवदी त्रैदशीवरभुमदौ लिखितं क्षत्रपतीब्राह्मण कासिके वाशौ(!)॥

See Rāj. Mitra, Notices, VII., p. 303. A different work of the same title, Bikāner Cat., p. 405. [H. T. COLEBROOKE.]

1767.

2652. Foll. 250 (wanting foll. 1, 8, 31, 41, 43, 161, 163, 191, 218, 227–34; double nos. 99, 118, 144); size 10 in. by 6 in.; careless Devanāgarī writing, of 1533 A.D.; nine lines in a page.

Sāragrāha-Karmavipāka, a similar digest, by one who calls himself the eldest son of *Kāhnaḍa*, or *Kānhaḍa* (i.e. *Kṛishṇa*), and grandson of *Padmanābha*.

The work seems to have been compiled, in 1384 A.D., under the patronage of *Karṇasiṃha*, minister to King *Durgasiṃha* of *śrī-Nandapadra*(?), son of *Maṅgala Bhūpāla*.

The present MS. commences in the fourth verse of the introduction; but the beginning, as well as some of the defective verses further on, are here supplied [in brackets] from a collation of four Bombay MSS. kindly sent by Professor R. G. Bhandarkar:

[यो देवः किल पूर्वसर्गसमये संस्मर्यते ब्रह्मणा
यश्चादौ सुरसिद्धदैत्यमनुजैरभ्यर्च्यते कर्मणा।
विघ्नव्रातविघातजातकठिनं कुंठं कुठारं करे
विभ्राणं तमुपास्महे गजमुखं सिद्धेः परं कारणं॥ १॥
वंदे विश्वनुतां पितामहसुतां वाग्देवतामेव तां
यस्याः पुण्यपदप्रसाददलिताशेषोग्रजाड्यो जनः।
उद्यत्पावणचंद्रसांद्रितसुधापाथोधिवीचिच्छटा-
निर्णिक्काननवर्णवाक्यनिकरैर्विद्वत्सु संदीप्यति॥ २॥
तमादिदेवं जगतामधीशं
चतुर्मुखं ध्यानजुषं प्रपद्ये।
चराचरं यत्स्मरणाद्बभूव
विद्यास्तथाष्टादश यन्मुखेभ्यः॥ ३॥
विश्वत्रातारमीशं दलितदनुसुतं मुक्तिदं भक्तिभाजां
विघ्वघ्नरूपं विभुद्धं विबुधजनघनप्रीतिदं योगिगम्यं।
विष्णुं कालग्रसिष्णुं करकहितग]दाशंखचक्राब्जचापं
पापं विद्रावयंतं भवजभयहरं ब्रह्ममूर्तं प्रपद्ये॥ ४॥
देवं सुधाकरकलाकलितोत्तमांगं
व्यक्षं त्रिशूलधरमद्रिसुतावृतांगं।
कोपप्रसादमतिवर्जितमुग्रवीर्यं
वंदे सुरर्षिगणं सिद्धततुं वृषांकं॥ ५॥
अथ॥ दृष्टं यदत्र तत्सम्यग्नीत्वा सारं हि शास्त्रतः।
ग्रंथकर्तुरथो व्यक्तिः प्रोच्यते परमार्थतः॥ ६॥
[राजा] यत्र सुरे(l. पुरे) सुरेश्वरसमः श्रीदुर्गसिंहो महान्
श्रद्धा यस्य तनोः पदे च महिषी धन्यांबिका राजते*।
[यत्साचिव्य]धुरां परां कलयति श्रीकर्णकंठीरवः
कस्तद्वर्णयितुं क्षमः क्षितितले श्रीनंदपुत्रो(पद्रं Bo.)
[तस्मिन्॥ [बुधः॥ ७॥

* राजते MS. In the only Bomb. MS. which has this *śloka*, this *pāda* reads thus: अर्धांगे ननु यस्य पद्म-महिषी-र्यांबिका राजते।

येनादौ] जगदीश्वरेण हिभना(जनता Bo.) मर्यादया [स्थापिता
ये दायेन समुद्भूतावनिभृता धर्मद्रुहो नाशिताः ।
सोहं(I. ऽर्य) संप्रति दुर्गसिंहनृपते(ति Bo.)र्गोत्रावतीर्णो- [शतस् (ङतस् MS.)
तत्तत्सर्वैमिदं करोति यदहो नान्येन निष्पद्यते ॥ ८ ॥

तस्मिन् राज्ये
वेदव्यास इव प्रपंचचतुरस्तच्छिष्यतां नाटयन्
आसीद्विश्वपुराणपाठनिरतः स्वाचारवान् शुद्धधीः ।
विख्यातो भुवि चित्रकूट इति वै यो नागरज्ञातिषु
प्रज्ञागर्वितवाचकेषु धिषणः श्रीपद्मनाभाभिधः ॥ ९ ॥

तस्यात्मजः काह्नडदेवनाम्ना(I. नामा)
व्यासः प्रयासैकमतिः सुपुण्यै[: or ण्ये] ।
गयाप्रयागादि विगाह्य तीर्थो-
न्यनेकशोकं(I. गं) विमलीचकार ॥ १० ॥

[य]स्वगण्यकृतपुण्यसंचयै[रु]द्धार निजपूर्वपूरुषान् ।
उद्यमै[क]निधिरुन्नमात्मधीज्ञातिमंडनमिहावभासते॥११॥

तस्य वश्यमनसः सुतो ऽग्रजः
शास्त्रसारकृतसंग्रहव्रजः ।
लोकशोककरकर्मकृंतनः(नं v.l.)
शास्त्रशस्त्रनिदमाबबंध सः ॥ १२ ॥

शास्त्रेभ्यः सारमादाय केवलं ग्रंथधारणं ।
तस्मादस्मासु तुष्यार्थैतु(I. तुष्यंतु) सूरयः शास्त्रपारगाः॥१३॥

तद्यथा तथ्यमेव सिद्धं(द्ध v.l.)नृपतिभर्तृहरिवाक्यं ।
नमस्यामो देवान्नु हतविधेस्ते ऽपि वशगा विधि°
तस्माद्धिग्यकश्च । [(*Bh., Nīt.* 92 or 94) ॥ १४ ॥
यदैहिकामुष्मिकभावसिद्धं
बुद्धा वियुक्तमुत बुद्धिवृद्धं ।
यत्कर्म दैवाख्यमिह प्रसिद्धं
शुभाशुभं नौमि तदीशनद्धं ॥ १५ ॥

तत्र मादं(तत्राप्यरं Bo.) दुःखकरं नराणां
शुभेतरकर्म निरीक्ष्य पाके ।
यदूचुराद्या मुनयो विचार्य
निजार्थबुद्धा विविधप्रकारं ॥ १६ ॥

गर्गो मनुर्गौतमयाज्ञवल्क्यौ
बोधायनः सुश्रुतशालिहोत्रौ ।
शातातपः प्राणिगणानुकंपी
पुराणकर्तो यदुवाच वेधाः ॥ १७ ॥

नानाभेदेषु वेदेषु यद्यदुक्तं मनीषिभिः ।
धर्मशास्त्रपुराणेषु कर्म किं पाकलक्षणं ॥ १८ ॥

किंचिद्गर्गोन्नीतमाच्चापि किंचित्
किंचिन्नीत्वा सुश्रुताच्छालिहोत्रात् ।
मन्वादिभ्यः सत्यवत्याः सुताच्च
पौराणेभ्यः सारमादाय किंचित् ॥ १९ ॥

विद्वज्जनविनोदाय हिताय भुविनां(I. भ°) भुवि ।
सारग्राहमिदं नाम्ना साम्प्रायं शास्त्रमुद्धरे ॥ २० ॥ °

Fol. 5*b*: इति सारसंग्रहे(!) कर्मविपाके दैवकल्पना-प्रकरणं ॥ अथ प्रकरणाधिकारसंख्या ॥ तत्र
मौलगिनृपतिविरचितं कर्मविपाकं यतः पुरस्कृत्य ।
रचितो ग्रंथस्तस्मात्प्राग्रं नाम तस्यापि ॥ १ ॥
ग्रंथे प्रकरणान्यत्र पंचपंचाशदेव हि ।
अधिकाराः पंच युक्ताश्चत्वारिंशत्समन्विताः ॥ २ ॥
शतत्रयं परिख्याता दानानां(!) शांतिकारणं ।
पंचाशद्विरुपेतानि अष्टौ चैव शतानि तु ॥ ३ ॥
चत्वार्येव सहस्राणि ग्रंथवृत्तश्लोकानि संख्या प्रकीर्तिताः(!) ।
एवं ५२०० श्लोकसंख्या प्रकीर्तिता ॥
एवं मयाधिकाराणां संख्या ग्रंथस्य च स्मृता ।
न संशयो ऽत्र कर्तव्यो न न्यूनमधिकं भवेत् । अथ सारग्रहणं ।
षट्सप्ततिसमायुक्तं विज्ञानेशाच्छतद्वयं ।
पंच बोधायनीयानि गृहीतानि शतानि च ॥ °

Thus the author states that his compilation is principally based on *Maulaji Nṛipati's Karmavipāka*, 1000 *ślokas* (in round numbers) having been taken therefrom, interlaced with quotations from other sources (*Vijñāneśa, Baudhāyana, Śātātapa, Dānakhaṇḍa, Ācāradīpa, Jñānamaṇḍala, Āyurveda, Bālacikitsā, Purāṇas* (of which he knows eighteen), and other works, the whole amounting to 5200 *ślokas*. After this statement he proceeds: अथ मौलगिः ।
नत्वा श्रीशमुमेशदंतिवदनौ शक्तिं ग्रहान् वाडवान्
पुण्यानां तु निजापराध[ज]नितं दंडं विधायाधुना ।
श्रीमान्मौलगिभूपतिः स्वविहितं धर्मं प्रजापालनं
सम्यक्कर्तुमपुण्यरोगशमनं ब्रूते विधिं शास्त्रतः ॥
शास्त्रत इति तदाह ।
पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः ।
वेदा स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ °

अथोद्देशेन व्याप्तयः fol. 15*a*; अथ स्त्रीणामाचारवाक्यानि 16*b*; इति ज्ञानमंडलोक्तस्त्रीकर्मविपाकः 20*a*; इति ज्ञानमंडले पुरुषकर्मविपाकोद्देशः 21*a*; अथ प्रायश्चित्तलक्षणं 22*a*; इति श्रीमद्भिरचिते सारग्राहे कर्मविपाके प्रायश्चित्ताधिकारः 54*a*; इति सारग्राहे कर्मविपाके ० चांद्रायणविधिनिर्णयः 58*a*; इति श्रीमद्भिर[चिते कर्म]विपाके ऐहिककर्मप्रायश्चित्तानि 63*b*; इति सर्वशास्त्रसारग्राहे(!) कर्मविपाके सद्भिरचिते प्रायश्चित्तग्रहणे प्रायश्चित्ताधिकारः ॥ अथ दानप्रशंसा । 75*a*; इति दानसंकल्पप्रयोगविधिः 93*b*; इति श्रीमद्भिरचिते कर्मविपाके सारग्राहे प्रतिकरणव्यवस्थाकरणं 102*a*, etc. It ends:

वदनं प्रसाद[सद]नं सदयं हृदयं सुधामुचो वाचः ।
करणं परोपकरणं येषां केषां न ते वंद्याः ॥

इति सारग्राहो नाम वृद्धकर्मविपाकः समाप्तः ॥ समाप्तं चेदं कर्मविपाकनाम धर्मशास्त्रं ॥ संवत् १५ आषाढादि ९० वर्षे अश्वनशुदि १ दिने ऽलेषि ॥

One of the Bombay MSS., which will be described in Prof. Bhandarkar's next Report, here adds the following verses kindly placed by him at my disposal: अथ समयः ॥

आदौ बभूव भुवि विक्रमभानुनामा
भूवल्लभान्यनृपसिद्धशिरोललाम ।
तत्प्राज्यराज्यसमयातिगतांतरिक्ष-
वेदान्विताब्धिविधुसंख्यशरच्छतेषु (*Saṃv.* 1440) ॥
शाके रसोल्लरशतेषु गतेषु राम-
क्षोणीमितेषु (*Śaka* 1306) दयितेषु सहायिनेषु ।
मास्यर्ककेतापविषमे किल भुज्जनाह्नि
रक्षेशरश्मिरमणीयवलक्षपक्षे ॥
तिथौ स्कंदाक्षिसंख्ये च भाजद्राजात्मजाहनि ।
शुभ ऋक्षे विशाखाख्ये योगे सति शिवाह्वये ॥
सुरपतिपुरपूतमुद्रे समुद्रे सकलकलाचंद्रे ।
श्रीनंदपत्तनगरे(!) पुण्यचयैरुल्लसद्भद्रे ॥
श्रीमन्मंगलभूमिपालतनये श्रीदुर्गसिंहे नृपे
राज्यं शासति शाश्वतं विजयिनि क्षोणींद्रतां तन्वति ।
तत्साचिव्यधुरंधरे सुचतुरे मन्त्रीश्वरे दातरि
व्यापारान्परिशीलयत्यनुदिनं श्रीकर्णसिंहे सति ॥
मन्येवं(l. मयैवं) सौम्यसमये विपाकः पूर्वकर्मणां ।
सारग्राहाभिधः श्रेष्ठस्तेनैवार्यं समुद्धृतः ॥
यादृग्ग्रंथेषु मे दृष्टं तत्तथैवोद्धृतं मया ।
सुसंबद्धमसंबद्धं प्रसीदंत्वत्र सूरयः ॥

Cp. Bhandarkar, Report, 1882-3, p. 63, and Cat. of Deccan Coll., p. 251 (where the work is called *Sārasaṃgraha*, as at fol. 5*b* of the present MSS.); Cat., p. 139 (*Sārasaṃgrāhaka*).

[GAIKAWAR.]

1768.

84a. Foll. 109; size 10¾ in. by 4¾ in.; legibly written, in Devanāgarī, in 1770 A.D.; fourteen lines in a page.

Karmavipāka, another work on expiatory rites to be performed with the view of averting evil influences, by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha*.

It begins:

दिवाकरपदद्वंद्वं फलद्वंद्वप्रदायकं ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहं ॥ १ ॥

See Aufrecht, Cat. Bodl., no. 659 (transcribed from the present MS.), where a list of authorities is given.

It ends: शीतज्वरनाशे गुडूचीसमिधः । कन्यार्थे मध्वक्ता लाजाः ॥ इति त्वरितरुद्रप्रयोगः ॥

इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ कर्मविपाकः समाप्तः ॥

Regarding the author, see above, no. 1464.

[H. T. COLEBROOKE.]

1769.

2700. Foll. 417, two of which (375 and 376) are wanting; size 9½ in. by 4½ in.; legibly written, in Devanāgarī; seven lines in a page.

Vidhānamālā, a treatise on ceremonies to be performed with a view to averting evil influences, by *Nṛisiṃha Bhaṭṭa*.

It begins:

प्रणम्य लंबोदरमुन्नमानां संतोषदं सर्वपुराणदृष्टं ।
धर्मार्थकामव्यवहारसिद्धै करोमि शुद्धार्थविधानमालां ॥ १ ॥

तत्रादौ पुण्यवतीविधानं निरूप्यते । प्रथमतौ दृश्यमानं रजः साध्वसाध्विति विविच्य साधुन[:] प्रतीकारः कथ्यते । ०

इति ० प्रथमतौ रजोजोपहरविधानं fol. 4*b*; ० विकृति-प्रसवजनितविघ्ननाशनविधानं 6*b*; ० यामलोत्पत्तिविधानं 8*a*, etc.; ० नवग्रहपीडाशमनविधानं 20*b*; ० वायसग्रहविधानं 21*a*; ० हस्तिपादग्रहपीडाशांतिविधानं 22*b*; ० कर्णग्रहपीडाशमनविधानं 23*a*, etc.;--० विवाहव्रतबंधेषु मातृरजोदोषजनितविघ्नहरविधानं। अथ पुण्याहवाचनं 411*a*.

It ends: इति स्वस्तिवाचनं ॥ इति श्रीविधानमालायां श्रीमन्नृसिंहभट्टविरचितायां सर्वकामसिद्धिदं स्वस्तिवाचनाख्यं नाम विधानं २३९ ॥

प्रकरणानि द्विशतचत्वारिंशत्फलश्रुतिसहितं ॥

समाहृतमिदं शास्त्रं सर्वशास्त्रार्थसंग्रहात्।
विधानमालिकाख्यं हि प्राणिनामुपकारकं ॥ १ ॥
धर्मार्थैकामशास्त्रेभ्यः संगृह्यालंकृतं मया।
उद्धृतं सर्वपुष्पेभ्यो यत्तत्स्यान्मधुमक्षिकं ॥ २ ॥
ग्रंथस्यास्यानुरागेण मयानुग्रहणेन वा।
संतोषयंतु विद्वांसः सचेतांसि(l. स्व०) समंजसा ॥ ३ ॥
वैराटे विषये ऽस्ति चंदनगिरेर्गैर्व्यूतिमात्रे पुरं
देव्याः प्राक् सुमनोहरं वसुमतीतीरे ऽग्रहारो महान्।
तत्रत्यो ऽत्रिकुलोद्भवो गुणनिधिः श्रीमान्नृसिंहो द्विजश्
चक्रे शास्त्रमिदं नृणामुपकृतिं संधाय चित्ते निजे ॥ ४ ॥
विधानमालां ग्रथितां मयात्र
गुणानुसंधानविराजमानं।
प्रमेयसारैः सुभगां पवित्रां
कुर्वंतु कंठेषु निजेषु धीराः ॥ ५ ॥

इति श्रीनृसिंहभट्टविरचिता विधानमाला समाप्ता ॥ संवत् १७३२ समयनामकाब्दिकसुदि ९ शनैश्चर समाप्त ॥

[Mack. Coll.]

1770.

921. Foll. 192; size 10¾ in. by 4½ in.; legibly written, in Devanāgarī, about the middle of last century; ten lines in a page.

A commentary on the preceding work (? by *Viśvanātha*, son of *Hari*). It begins:

यो धान्वंतरशास्त्रमर्थचतुरः कारुण्यरत्नाकर-
सौजन्यामृतपूर्णमानसलसच्छ्रीशंभुचित्तः सदा।
भूपालालिकलालनीयचरणद्वंद्वस्य सूनुर्हरेर्
भूविस्तारियशाः सदा जयति स श्रीविश्वनाथः सुधीः ॥ १ ॥
प्रणम्य लंबोदरम् ० २ ॥

विधानमालेति ग्रंथं नामधेयं तच्चान्वर्थं विधानानां मालेव मालापरंपरेत्यर्थः। विधानं विधिः। ०

The commentary is not quite complete.

It ends: इति श्रीविधानमालायां पितामहस्मृत्युक्तं सर्वदिव्येषु धर्मवाहनधर्मचारिकाविधानं संपूर्णं। this section (236) ends at fol. 402*b* of the preceding MS.

[H. T. Colebrooke.]

1771.

1745a. Foll. 40; size 8½ in. by 3¾ in.; good, old Devanāgarī handwriting; eleven lines in a page.

Lakshahoma-paddhati, a manual for the performance of the *Lakshahoma*, for the propitiation of the various planetary agencies, by *Kāśī Dīkshita*, son of *Sadāśiva Dīkshita*.

It begins: अथ लक्षहोमपद्धतिः ॥ तत्र तावत् नानादेवतोद्देशेन वक्ष्यमाणनानामंत्रैः सर्वापक्षयार्थं परमसुखप्राप्त्यर्थं क्रियमाणस्त्वेक[:।] उक्तं च बृहत्पाराशरेण ॥

अथातः संप्रवक्ष्यामि द्विजेंद्राः श्रूयतामिदं।
लक्षहोमविधिं पुण्यं कोटिहोमविधिं तथा ॥ ० 22 *ślokas*

इति बृहत्पाराशरे शांत्यध्याये लक्षहोमविधिः ॥ प्रायश्चित्तार्थं गायत्र्या लक्षहोमः कार्यः। गायत्र्या तिलहोमसहस्रे चैकः प्राजापत्य इति। ०

अथ पुण्याहवाचनं ० मातृकापूजा fol. 6*a*; इति नांदीश्राद्धं। अथ वरणं 9*a*; इति ऋत्विग्वरणं। ततो वास्तुपूजनं 10*a*; अथ अग्निध्यानं 22*b*, etc.

It ends: सर्वान्कामानवाप्नोति स्वर्गे लोके महीयत इत्यादि प्रागेव लिखितं ॥ इति लक्षहोमपद्धतिः समाप्ता ॥ इति श्रीयाज्ञिकसदाशिवदीक्षितसुतकाशीदीक्षितकृता लक्षहोमपद्धतिः समाप्ता ॥

[H. T. Colebrooke.]

1772.

2016. Foll. 6; size 9 in. by 3¾ in.; fairly written, in Devanāgarī; nine lines in a page; worm-eaten and injured by wear.

[*Yati-*] *Ārādhanaprayoga*, a manual of rules and formulas for the propitiation of ascetics.

It begins: अथ यतीनां समाराधनप्रयोगः ॥ स च पार्वणश्राद्धानंतरं श्वः स--- स चैवं ॥ कृतनित्यक्रियः मध्याह्ने षोडशाष्टौ चतुरो वा ब्राह्मणानाहूय कर्ता--- राचम्य पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य श्रीनारायणप्रीत्यर्थं ब्रह्मीभूत--रोः आराधनं करिष्ये ॥ तदंगेक्षणं पाद्यं च करिष्ये ॥ ० The *mantras* are accented.

Fol. 5*b*: अनेन ब्रह्मीभूतस्य गुरोः आराधनाख्येन कर्मणा तेन श्रीनारायणः प्रीयतां न मम ॥ ततः सुहृद्युक्तो भुंजीतेति ॥ यतीनां पुण्यतिथिसमाराधनप्रयोगः ॥ ततः प्राप्तदशमीमहालयतीर्थैप्रयुक्तादिश्राद्धानि कुर्यात् ॥ ० 8 lines ॥ वसिष्ठः ॥

चतुर्विधानां भिक्षूणां ज्ञातिबंधुसुतादिभिः ।
एकादशे हि(?ऽह्नि) कर्तव्यं श्राद्धं तेषां तु पार्वणं ॥

इति आराधनप्रयोगः समाप्तः ॥ शके १७१९ पिंगलनामसंवत्सरे कार्त्तिकशुद्धपौर्णिमा मंदवासरे इदं पुस्तकं नेनोपनामेन गणेशात्मकप्रभाकरेण लिखितं ॥

On the front and back pages the treatise is called "*Yatīnām puṇyatithisamārādhanaprayoga.*" [Dr. John Taylor.]

1773.

1217b. Foll. 6; size 11½ in. by 5 in.; fairly written, in Devanāgarī, about 1700 A.D.; fourteen lines in a page.

Dānaphalavrata, a description of a ceremony to be performed, it seems, by unhappy wives who have become estranged from their husbands—like *Kuntī* (also called *Kusumāvatī* or *Pushpāvatī*) and *Damayantī*—or are in fear of losing their sons, like *Sumitrā*.

The names of these personages occur in a tale given (on the last three pages) in illustration of the preceding description, and ascribed to the *Padmapurāṇa*.

It begins: अथ दानाफलव्रतं (! thus always) ॥

संलिप्य गोमये भूमिं चतुरस्र[क्र]मंडलं(०लां) ।
तन्मध्ये ऽष्टदलं पद्मं शोभितं कर्णिकान्वितं ॥ १ ॥

प्राणायामत्रयं कृत्वा संकल्पं तु ततः परं ।
कलशं शंखपूजां च ततः पूजां समारभेत् ॥ २ ॥

तद्दक्षिणभागे त्रिकोणमंडलं कुर्यात् । तन्मध्ये गणपतिं पूजयेत् । ततो द्वारपूजा । पूर्वद्वारे वक्रतुंडाय नमः । एकदंष्ट्राय ० दक्षिणे महोदराय नमः । गजाय · पश्चिमे लंबोदराय । विकटाय · उत्तरे । विघ्नराजाय · धूम्रवर्णाय · अग्रे वास्तुपुरुषाय । ऊर्ध्वभागे भारत्यै । अधोभागे रत्यै । मध्ये गणपतये ।

अत्रागच्छ गणाधीश इह स्थाने च याम्यहं ।
यावत्यां पूजयिष्यामि तावत्यां [सु]स्थिरो भव ॥ १ ॥

चतुर्भुजं महाकायं गजवक्त्रं सुदंतकं ।
शूर्पकर्णं त्रिनयनं ध्यायेत्सर्वार्थसिद्धये ॥ २ ॥

ध्यानं गणपतये ० आवाहनं । एकदंताय · आसनं । गजवक्त्राय · पाद्यं । ० --- ॥ अथारुणपूजा । ० --

अथ महालक्ष्मीपूजा fol. 1*b*; अथ तुलसीपूजा 2*a*; अथ सूर्यपूजा 2*b*; अथांगपूजा 3*a*; अथ पुष्पपूजा 3*b*; अथ अष्टोत्तरपूजा 4*a*; इति पूजाविधिः 115*a*.

Fol. 5*b*: अथ कथा ॥ ऋषय ऊचुः ॥

पितृगृहे वर्तमानां कुंती व्यासं ददर्श ह ।
नमः कृत्वा तु सद्भक्त्या पाद्यार्घाचमनादिकं ॥ १ ॥

दृष्ट्वा संप्रार्थितं व्यासं कुंती मुकुलितांजलिः ।
पतिपुत्राव्र(?त्र)मोक्षार्थं व्रतं ब्रूहि महामुने ॥ २ ॥

व्यास उवाच ॥

शृणु दानाफलं नाम व्रते(?व्रतं) सर्वव्रतोत्तमं ।
कैलासशिखरे रम्ये पार्वतीपरमेश्वरौ ॥ ३ ॥

व्रतानां सर्वदानानामुत्तमं ब्रूहि तद्व्रतं(! some [omission) ॥

श्रीशंकर उवाच ॥

साधु देवि त्वया पृष्टमुत्तमं सर्वतः शृणु ।
भूमौ तु भारते वर्षे पुण्ये च यमुनातटे ॥ 8 ॥ ० १२ ॥

स्त्रिय ऊचुः ॥

पुण्यव्रतमिदं देवि सौरं पापप्रणाशनं ।
सर्वसंपत्करं नृणां पतिपुत्राव्र(?त्र)मोक्षदं ॥ १३ ॥ ०

It ends:

तदा व्रतं कृतं सर्वं भूमौ दानाफलं(!) महत् ।
सुपुत्रांल्लभते कुंती त्वं कुरु व्रतमुत्तमं ॥

ये पठंतीदमाख्यानं शृण्वंति [म्र]श्रयान्विताः ।
सर्वपापविनिर्मुक्ताः यास्यंति परमां गतिं ॥ ५७ ॥

इति श्रीपद्मपुराणे उमामहेश्वरसंवादे दानाफलव्रतं ॥

[H. T. Colebrooke.]

1774.

2129. Foll. 2; size 9¼ in. by 4¼ in.; fairly written, in Devanāgarī, about the middle of the last century; thirteen lines in a page.

Sahagamanavidhi, or *Satīvidhāna*, a short treatise (in 66 *ślokas*) on the rite of *Satī*, by *Govindarāja* (?). Rather incorrect.

It begins: श्रीकृष्ण उवाच ॥

अथान्यात्(?अधुना) संप्रवक्ष्यामि नारीणां परमो विधिः
[(l.०मं विधिं)।

भर्त्रा वैव(?सहैव) मरणं स्त्रीणां चेव प्रशस्यते ॥ १ ॥

गच्छते सत्यलोकं तु संयुक्ता पतिना(!) सती।
सर्वदेवमयो यस्मात् सर्वतीर्थमयः पतिः ॥ २ ॥

नदीनां च यथा गंगा सुराणां च यथा हरिः।
मुनीनां च परं ब्रह्म स्त्रीणां चैव तथा पतिः ॥ ३ ॥

It ends:

उत्तमा मध्यमा लोका ये चान्ये तत्र संस्थिताः।
ते सर्वे हरिमुच्चयै करतालीं प्रदापयेत्(!) ॥ ६६ ॥

इति श्रीगोविंदपराज(!)विरचितसहगमनविधिः ॥ After which is added, by a different hand, सतीविधानं। Outside it is called संगमनविधि.

Perhaps it is an extract from a *Purāṇa* or some other work. [GAIKAWAR.]

1775.

1705b. Foll. 13; size 8 in. by 4 in.; clearly written, in Devanāgarī; ten lines in a page.

Nīlodvāhapaddhati, a manual for performing the ceremony of letting loose a bull, in connection with funeral rites.

It begins: अथ नीलोत्सर्गकालो उच्यते ॥

ग्रहणद्वितये पुंये(*r.* पुण्ये) तीर्थे चैवायनद्वये।
विषुवद्वितये श्राद्धे मृताहेष्वष्टकासु च ॥ १ ॥

इति सूत्रकाराणां वाक्यं। यथा। कार्त्तिक्यां फाल्गुन्यां वैशाख्यां माघ्यां आश्वयुजि अष्टकासु चंद्रसूर्यग्रहणयोर्विषुवति उदगयने दक्षिणायने प्रेतस्यैकादशाहे इति कालाः ॥ तथा मत्स्यपुराणात्। आश्वयुज्यामथाषाढ्यां चैत्रवैशाखयोरपि। ०

It ends: अथ शांतिकोपहाराः ॥ इति श्रीनीलोद्वाहपद्धतिः समाप्ता ॥ संवत् १६४८ वर्षे माघवदि ७ भौमे लिखितं ॥
[H. T. COLEBROOKE.]

1776.

2938. Fol. 1; size 10¾ in. by 5½ in.; good, modern Devanāgarī; 20 lines in all.

Hitasūtra, a string of 65 rules of conduct and moral maxims, prepared, for Ballantyne, by *Veṅkaṭ-rām*, on 10th July, 1860.

It begins: ओं धर्मोपादानं संतोषः श्रेष्ठः १ ॥ अशीलस्याचारो न भ्राजते २ ॥ क्षेमवतो नाल्पे दोषे नाशो ऽस्ति ३ ॥ शाम्येत्पापं शीलं यो ऽधिगच्छेत् ४ ॥ वामाचारः पितुरप्यनिष्टः५ ॥ आचार्यैस्त्राज्ञां कुर्वीत ६ ॥ मानित्वं मूर्खाणां मिथ्याचारः ७ ॥ ०

The sentences are divided into seven adhyāyas; viz. five of 10 each, and the last two of 9 and 6 resp. [J. R. BALLANTYNE.]

1777.

2316A. Foll. 65; size 13¼ in. by 4¾ in.; good Devanāgarī writing, of 1809 A.D.; nine lines in a page.

Gotrapravaramañjarī, an exposition of the genealogies of the several *gotras*, and of the rules by which intermarriage is forbidden on account of community of ancestors invoked in the *pravara*, or invocation to *Agni*; by *Purushottama Paṇḍita*. It begins:

यज्ज्ञं यत्स्थं यदीयं जगदिदमखिलं यज्जयं यत्प्रधानं
यत्प्रेर्यं यन्निवासं स्थिरचरहृदयं यत्पुरा संप्रभूतं।
यत्क्रीडावस्तुभूतं यदनुभवसुखं यत्स्वरूपानभिज्ञं
यत्स्वापं यत्प्रबोधं यदतिहिततमं ब्रह्म तस्मै नमोऽस्तु॥१॥

आचार्यौन्वेदकल्पान्परिहतनिरतान् कल्पसूत्रप्रणेतॄन्
सर्वान्बोधायनादीन् प्रणिपतितजनत्राणशीलान् प्रणतान्
सूत्रोपात्तगोत्रप्रवरसुमनसां मंजरीं तां करिष्ये [म्य।
यज्ज्ञानात्कर्मकांडं फलति निजफलं ज्ञानकांडं च सर्वं॥२॥

मत्स्यं कूर्मं वराहं खंजनृहरीन् रामांश्च रामानुजान्
नत्वा द्वादश कल्किविष्णुसहितान् ब्रह्मावतारानिमान्
तत्तत्प्राक्(l. प्रोक्त)पुराणभारतगताः स्मृत्यंतरोक्ताश्च ये
तैर्गोत्रैः प्रवरैश्च पूर्वगदितां वक्ष्याम्यहं मंजरीं ॥ ३ ॥

Under each of the eight *gotras*, the corresponding passages are generally quoted from *Baudhāyana*, *Āpastamba* and *Satyāshāḍhin*, *Kātyāyana* and *Laugākshi*, *Āśvalāyana* and the *Matsyapurāṇa*. This chapter ends fol. 52*a*, after which follow some chapters treating of intermarriage, and expiations of irregularities committed in this respect.

इति क्षत्रियवैश्यप्रवरकांडद्वयं fol. 53*b*; ० असंप्रज्ञातबंधूनां गोत्रप्रवरकांडं fol. 54*a*; ० गोत्रप्रवरतत्त्वज्ञानमाहात्म्यप्रतिपादनपरं सूत्रकांडं fol. 55*a*; ० मातृगोत्रविवाहप्रतिषेधयुक्तिकांडं fol. 57*a*; ० सावैवर्णिकप्रवरकांडं fol. 58*b*; finally महाप्रवराध्यायपरिसमाप्तिगोत्रप्रवरकांडं ॥

[H. T. Colebrooke.]

1778.

1708. Foll. 60; size 9 in. by 4 in.; fairly good, modern Devanāgarī writing; 9–11 lines in a page.

Gotrapravaramañjarī.

[H. T. Colebrooke.]

1779.

2719. Foll. 30; size 8 in. by 4 in.; good, rather old, Devanāgarī writing; 11–14 lines in a page.

Pravaradīpikā, a similar treatise, by *Kṛishṇa* (*Śaiva*). It begins:

देवस्येशानसूनोः सुरगणमुकुटज्योतिरुद्द्योतितांघ्रेः
शुंडादंडः करोतु क्रकचविकसयन् श्यामलो मंगलं वः।
दंतो यस्यैकदेशे विकसितविपुलस्फाटिकस्तंभकांतिः
प्राग्ब्रह्मांडकोटौ हरिचरण इव व्योमगंगाप्रवाहः॥ १॥

स शिवः पातु वो नित्यं यत्प्रपंचमहोदधौ।
उत्पद्यंते विलीयंते ब्रह्माद्या बुद्बुदा इव॥ २॥

महालक्ष्मीं महामायां सकुलस्यैव देवता(० तां)।
यस्याः स्मरणमात्रेण वाग्विलासो भवेद्ध्रुवं॥ ३॥

परंपरात्मकं वंदे श्रीरामचरणांबुजं।
यं नत्वा विवृणोत्कृष्णः(*r.* व्य०) प्रवरान् मुनिभाषितान्॥४॥

मुनीनां नाम गोत्राणि वंशावतरणं तथा।
प्रवराणां तथा साम्यमसाम्यं विस्तरादहं॥ ५॥

The *gotra*-lists end fol. 13*b*: इति प्रवरदीपिकायां कृष्णशैवविवृतौ अगस्त्याष्टगणानां सप्तमुनीनां प्रवरविवरणं समाप्तं॥

Then follow rules concerning intermarriage, compiled from various authorities, among which may be mentioned: *Kārikā*, fol. 23*b*; *Caturviṁśatimata*, 15*a*, 20*a*; *Pravaradīpa*, 26*a*; *Pravarapradīpa*, 17*b*; *Pravaravivaraṇa*, 23*a*; *Mañjarīkāra*, 17*b*, 28*a*; *Maṇḍana*, 22*b*; *Śrāddhakalpa*, 21*b*; *Śrībhaṭṭapādāḥ*, 28*a*; *Shaṭtriṁśanmata*, 20*a*; *Smṛiticandrikā*, 15*a*; *Smṛitimañjarī*, 14*b*; *Smṛityarthasāra*, 14*a*.

For another MS. of this work (anonymous), see Rāj. Mitra, Bikāner Cat., p. 434.

[Mack. Coll.]

1780.

2316B. Foll. 23; size 13 in. by 4¾ in.; fair, modern Devanāgarī writing; nine lines in a page.

Gotrapravara-darpaṇa (or *-nirṇaya*), another treatise on the same subject, by *Kamalākara Bhaṭṭa*, son of *Rāmakṛishṇa*, and grandson of *Nārāyaṇa*.

In the arrangement of the matter the author follows the *Pravaramañjarī*, which is much quoted by him.

The treatise begins:

नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना।
कमलाकरसंज्ञेन गोत्रप्रवरनिर्णयः॥
क्रियते विदुषां प्रीत्यै ग्रन्थानालोच्य सर्वशः।

तत्र सगोत्राय दुहितरं न प्रयच्छेत्। असप्तानप्रवरैर्विवाह इत्यापस्तम्बगौतमाचार्यैः सगोत्रा सप्रवरा च निषिद्धा। तत्र सगोत्रस्वरूपमाह प्रवरमञ्जर्यां बौधायनः। ०

The author wrote his *Nirṇayasindhu* in 1611-12 A.D.

[H. T. Colebrooke.]

1781.

1572d. Foll. 24; size 10½ in. by 4¼ in.; fair Devanāgarī writing, of 1687 A.D.; eleven lines in a page.

Gotrapravaranirṇaya, another treatise on the same subject, by *Bhaṭṭa Raghunātha* (c. 1620 A.D.), son of *Bhaṭṭa Mādhava*, and grandson of *Bhaṭṭa Rāmeśa*.

It begins:

नत्वा गणेशं श्रीरामं सीतां लक्ष्मीं गुरूनपि ।
विघ्नेश्वरं भैरवं च रघुनाथेन धीमता ॥

गोत्रप्रवरनिर्णीतिः समासेन वितन्यते ।
तद्भावे सति गोत्रादिपरिणीतिप्रसक्तितः ॥

It ends:

भट्टरामेशचिंद्वम्य[elsewhere ० रामेशसूर्यैम्य-]सुत-
[माधवसूनुना ।

भूतो ऽयं रघुनाथेन गोत्रप्रवरनिर्णयः ॥

इति श्रीमत्पदवाक्यप्रमाणनिपुणतमभट्टमाधवात्मजभट्टरघुनाथ-
कृतो गोत्रप्रवरनिर्णयः समाप्तः ॥

[H. T. Colebrooke.]

1782.

3200. Foll. 17; size 8 in. by 6¼ in.; excellent Devanāgarī writing; eleven lines in a page.

Pravaranirṇaya, by *Viśvanātha Deva*, son of *Śambhu Deva*, and younger brother of *Rāma Deva*.

It begins: ओं नमः श्रीजानकीजानये । नमो ब्रह्मणे । नमो महेशाय । नमः गणपतये । नमः ऽऽपस्तंबाश्वलायनबौधायनकात्यायनेभ्यः ॥ अथातो यज्ञआद्धनहादानपरिणयनाद्युपयुक्तं गोत्रप्रवरनिर्णयं व्याख्यास्यामः । तदेतद्ब्राह्मणं भवत्यार्षेयं प्रवृणीत ऽऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्यर्यं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीत ऽइति बंधोरेव नैत्यथो संतत्या इति चैकं वृणीते द्वौ वृणीते त्रीणि(*r.* त्रीन्) वृणीते न चतुरो वृणीते पंच वृणीते ०

Iti Bhṛiguvaṃśapravaranirṇayaḥ, fol. 4*b*; *Aṅgirovaṃśa*, 9*b*; *Atrivaṃśa*, 11*a*; *Viśvāmitravaṃśa*, 12*b*; *Kaśyapavaṃśa*, 14*b*; *Vasishṭhavaṃśa*, 16*a*; *Agastivaṃśa*, 17*a*; then follow the *Kshatriya-* and *Vaiśya-pravarāḥ*.

It ends: द्व्यामुष्यायणानां प्रथममुत्पादकप्रवरोच्चारणमनंतरं परिगृहीतप्रवर[रे]च्चारणमिति कात्यायनाश्वला[यना]दयः ॥ इति श्रीमद्भुंभुदेवतनयरामदेवानुजश्रीविश्वनाथदेवविरचिते वर्णत्रयाणां प्रवरनिर्णयाः समाप्ताः ॥

The fly-leaf contains the following note:

Copied for me from a manuscript belonging to *Narasiṃhabhaṭ Grāmōpādhyāya* of Belgaum. The manuscript is not dated. It consists of 27 leaves about 9 in. long by 4⅜ in. broad. The characters are Nāgarī. Presented to the India Office Library. 23rd August, 1878. [J. F. Fleet, Bo. C. S.]

E. Treatises on Worship (Devapūjā).

1783.

1269. Foll. 68; size 7 in. by 3⅜ in.; fairly written, in Devanāgarī, in A.D. 1665; ten lines in a page.

Rudrapaddhati, a manual of directions and formulas for the performance of ceremonies to *Rudra*, in connection with the *Śrauta* ritual of the *Taittirīyas*, by *Nārāyaṇa Bhaṭṭa*, son of *Rāmeśvara Bhaṭṭa*.

It begins:

भट्टरामेश्वरसुतो भट्टनारायणः कृती ।
प्रणम्य रामं तनुते रुद्रानुष्ठानपद्धतिं ॥

तत्र तावद् यद्यप्यनेकासु यजुःशाखासु रुद्रः पठ्यते तथापि तैत्तिरीयशाखानुसारेण रुद्रप्रयोग उच्यते ॥ स्मार्तरुद्रप्रयोगस्य बौधायनसूत्रमूलकत्वेन बह्वृचादीनां च तत्र बौधायनं ग्राह्यं । बह्वृचादिभिर्दैशवाक्यानुसारेण बौधायनीयानुरोधित्वादिति । इह च रुद्रानुष्ठाने त्रैवर्णिकानामेवाधिकारो न स्त्रीशूद्रानुपनीतानां ॥ तेषां वैदिकमंत्रयुक्तकर्मण्यध्ययनाद्यभावेन साक्षाद्वचनाभावेनाधिकारादिति ॥ अन्यत्र चैतद्विस्तरेण निर्णीतं ॥ तत्र रुद्रः पंचधा । रूपं । रुद्री । लघुरुद्रो महारुद्रो ऽतिरुद्रश्चेति । एकादश गुणवृद्धा । सर्वेष्व त्रेधा । जपरुद्रो होमरुद्रो ऽभिषेकरुद्रश्चेति । जपरुद्रो ऽपि द्वेधा । केवलजपात्मको होमात्मकश्चेति । होमाभिषेकयोस्तु केवलतदात्मकमेव । तत्र तावदक्षयकामः

श्रीरुद्रप्रीतिकामो वा उत्तरायणादौ० प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य ममकायिकादिसर्वपापक्षयार्थं श्रीरुद्रप्रीत्यर्थं वामुकरुद्रमहं करिष्य इति संकल्पयेत्। पुत्रकामस्तु दीर्घायुःसुपुत्रसिद्ध्यर्थं महारुद्रमहं करिष्य इति। ०

ततो वास्तुपूजनं fol. 14*b*;——इति (रुद्र)होमप्रकारसंक्षेपः 53*a*; ततो वसोर्धारा fol. 58*a*; this is followed by the accented text of *Taitt. Saṃh.* V. 4, 8, followed by a figured *stotra*, इह खर्वैश्वानराय प्रदिशो ज्योतिर्बृहत् preceded and followed by a number of *stobhas*. Then follow the *'śreyaḥsampādana'* on the part of the priests to the sacrificer, and the bestowing of *'dakshiṇās'* by the latter.

It ends: दीना[न]नाथांश्चात्रादिना संतोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः संतुष्टो हविष्यं भुंजीतेति॥ इति श्रीरामेश्वरभट्टात्मजनारायणभट्टसूरिणा काश्यां कर्मसज्ञानतुष्यै रुद्रानुष्ठानपद्धतौ रचिता समाप्तिमगमत्॥ ०॥ अथ रामेश्वरभट्टसूनुनारायणभट्टोक्ता होमसंख्या॥ तद्यथा। लघुरुद्रे अष्टाचत्वारिंशत्पक्षे दशशेन ०

Then follow computations of the number of *homas* to the several *Rudras* to be performed in a year, and the measures of the respective *kuṇḍa* to be used.

The opinion of *Rūpanārāyaṇa* is several times referred to by the author.

Colophon: इति० रुद्रपद्धतिः समाप्ता॥ संवत् १५८७ विश्वावसुनामसंवत्सरे कार्त्तिकवदि ५ तद्दिने जनार्दनपुरग्रामे कोनेरभट्टात्मजनृसिंहेन लिखितं॥

For another copy of this work, see Rāj. Mitra, Notices of S. MSS., I., p. 100.

[H. T. Colebrooke.]

1784.

1986. Foll. 17; size 8¼ in. by 4 in.; fairly written, in Devanāgarī; eight lines in a page.

Rudra-Laghunyāsa, a manual of formulas, intended for certain ceremonies in honour of *Rudra*, or for *Rudra*-worship generally.

It begins: ओम्॥ इडा देवहूमनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि श॒ंशिषद्विश्वे देवाः सूक्तवाचः पृथिवि मातर्मा मा हि॒ꣳसीर्मा मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यास॒ꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोऽनुमदंतु॥ ओं शांतिः शांतिः शांतिः॥ ओम्॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥ etc., the whole *Śatarudriya* (*Taitt. S.* IV., 5, 1–11); followed (on foll. 9*b*–14*a*) by *Taitt. S.* IV., 7, 1–11 (cp. no. 152, p. 21 of this catalogue). Down to the end of this section, marked रुद्र in the margin, the *mantras* are accented throughout.

Then follows a second section the leaves of which are marked लु० न्या० (the *Laghunyāsa* proper?), beginning (without accents):

ओम्। प्रजनने ब्रह्मा तिष्ठतु॥ पादयोर्विष्णुस्तिष्ठतु॥ हस्तयोर्हरस्तिष्ठतु॥ बाह्वोरिंद्रस्तिष्ठतु॥ जठरे अग्निस्तिष्ठतु॥ हृदये शिवस्तिष्ठतु॥ कंठे वसवस्तिष्ठंतु॥ वक्त्रे सरस्वती तिष्ठतु॥ नासिकयोर्वायुस्तिष्ठतु॥ नयनयोः सूर्याचंद्रमसौ तिष्ठेतां॥ कर्णयोरश्विनौ देवौ तिष्ठेतां॥ ललाटे रुद्रास्तिष्ठंतु॥ मूर्ध्न्यादित्यास्तिष्ठंतु॥ शिरसि महादेवस्तिष्ठतु॥ शिखायां चामुंडा तिष्ठतु॥ पृष्ठे पिनाकी तिष्ठतु॥ पुरतः शूली तिष्ठतु॥ पार्श्वयोः शिवाशंकरौ तिष्ठेतां॥ सर्वतो वायुस्तिष्ठतु॥ ततो बहिः सर्वतोऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु॥ सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु॥ मा॒ रक्षंतु॥ then accented: अग्निर्मे वाचि श्रितः॥ वा॒ हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि॥ वायुर्मे प्राणे श्रितः॥ प्राणो हृदये॥ हृदयं मयि॥ अहं०॥ अमृ०॥ सूर्यो मे चक्षुषि श्रितः॥——॥ चंद्रमा मे मनसि श्रितः॥०॥ दिशो मे श्रोत्रे श्रिताः॥०॥ आपो मे रेतसि श्रिताः॥०॥ पृथिवी मे शरीरे श्रिता॥०॥ ओषधिवनस्पतयो मे लोमनि श्रिताः॥०॥ इंद्रो मे बले श्रितः॥०॥ पर्जन्यो मे मूर्ध्नि श्रितः॥०॥ ईशानो मे मन्यौ श्रितः॥०॥ आत्मा म आत्मनि श्रितः॥०॥ पुनर्मे आत्मा पुनरायुरागात्॥ पुनः प्राणः पुनराकूतमागात्॥ वैश्वानरो रश्मिभिर्वावृधानः॥ अंतस्तिष्ठत्वमृतस्य गोपाः॥ then without accents:

अन्येनं सर्वशरीर॒ꣳ स्पृशेत्॥ आत्मानं श्रीरुद्ररूपीं ध्यायेत्॥

शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकं।
गंगाधरं दशभुजं सर्वाभरणभूषितं॥
नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनं।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं॥० 5 more *ślokas*.

आ त्वा वहंतु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिर्वीता जरैवैलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वो २॥

स्वामिन्सर्वजगंनाथ यावत्पूजावसानकं । [भव ॥
तावत्त्वं प्रीतिभावेन लिंगे(देवे marg.) ऽस्मिन्संनिधौ
निराकारो ऽपि पूर्णो ऽपि निर्गुणो ऽपि निरामया ।
मदनुग्रहमासाद्य भव त्वं भव मूर्तिमान् ॥
शांतो भव ॥ इति लघुन्यासः समाप्तः ॥ ध्यानं ॥
ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसंनं ॥
पद्मासिनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥
शके १७१६ ॥ आनंदनामसंवत्सरे भाद्रपदशुक्लत्रयोदशि इंदुवारश्रवणनक्षत्रप्रातःकाळतद्दिने इदं पुस्तकं रामचंद्रज्योतिषीन लिखितं ॥ विश्वेश्वरसुप्रसंन् ॥ पावसग्रामे न वास्तव्यं(!) ॥ विश्वेश्वरसंनिधं ॥ [DR. JOHN TAYLOR.]

1785.

2232. Foll. 22; size 9½ in. by 4½ in.; fair, modern Devanāgarī writing; 13 or 14 lines in a page.

Rudrabhāshya, a commentary, in 478 couplets, on the *Rudrādhyāya* (or *Śatarudriya*), by *Ahobala* (son of *Nṛisiṃha*), of the *Bhāskara* family (cf. no. 152).

It begins:

विश्वेश्वरं नतसुरासुरमौलिरत्नं
मंदारकुंदकुसुमावृतपादपीठं ।
भस्मावगुंठमहिकंठमुमोपकंठं
सोत्कंठमाश्रय मनः पटु नीलकंठं ॥ १ ॥
चेतोभृंग महेशपादयुगलं यद्विष्णुनेत्रार्चितं
तत्त्वं मौनि मनोमधुव्रततरव्रातार्थ्यं संश्रय ।
तत्पादाब्जमगण्यपुण्यविभवप्राप्यं ततो दुस्त्यजं
मा मा संत्यज मामको यदि तदा तत्रैव नित्यं वस ॥ २ ॥
संसारसागरसमुत्तरणप्रवीणः
श्रीमानहोबलमहाकविराजराजः ।
श्रीरुद्रभाष्यतरिमुज्ज्वलपद्यरूपां
चक्रे सदाशिवकृपासमुपात्तविद्यः ॥ ३ ॥
अहोबलः पूजितकालकालः
श्रीकालकालार्चितनीतकालः ।
श्रीरुद्रभाष्ये ज्वलचित्तमूलो
जयत्ययं शंकरदत्तशीलः ॥ ४ ॥
अहोबलो भास्करवंशभानुः
श्रीरुद्रमंत्रार्थविचारदक्षः ।
श्रीरुद्रभाष्यं तनुते नितांतं
प्रकाशयद्रुद्रमगाधभावं ॥ ५ ॥ ० ६ ॥
ब्रह्मचारिण इत्यादि महोपनिषदि स्फुटः ।
श्रीरुद्राध्यायमहिमा पुराणेषु स्मृतिष्वपि ॥ ९ ॥
श्रीरुद्राध्यायमध्यस्थमेकैकमपि नाम यत् ।
तदनंतमहापापमहावनहुताशनः ॥ १० ॥
न जाने गिरिजाजाने रुद्राध्यायजपात्परं ।
यज्ञपादब्जजादीनां पदं पादतलीकृतं ॥ ११ ॥ ० १२ ॥
सृष्टिपालनसंहारान्यो भवत्याद्युपाधिमान् ।
करोति स महारुद्रः श्रीरुद्राध्यायदेवता ॥ १३ ॥
तस्य देवादिदेवस्य श्रुतिप्रोक्तं तनुद्वयं ।
तस्यैतेत्यादिवेदेन बोधितं खलु तद्द्वयं ॥ १४ ॥

तथा चोक्तं ।

तस्यैते तनवो(r. तनुवौ) घोरान्या शिवान्येति शिवरहस्ये।
तस्यैते तनवो(r. तनुवौ) देवा घोरान्या घोररूपिणी ।
शिवान्या सा यतः(? न्यायतः) साक्षाच्छिवदा शिवरूपिणी
नम इति । [॥ १५ ॥ ० १९ ॥
वागादिभिः समाराध्याधीनत्वात्सप्रसादनं ।
प्रह्वत्वापरपर्यायं नम[:]शब्दार्थमीमहे ॥ २० ॥

ते रुद्र मन्यवे ।

ते सर्ववेदवेदांतप्रतिपाद्यस्य वस्तुनः ।
अमेयानंतकल्याणगुणभेदसुरूपिणः ॥ २१ ॥
शक्तिक्रोधात्मिका शंभोः शांतिरूपा भवत्वियं ।
मा बाधिष्ट महेशस्य भक्तानिष्टमपीशतां ॥ २२ ॥
हे रुद्र ते तवायं यो मन्युः प्रज्वलनात्मकः ।
क्रोधो ऽनर्थादिमूलो ऽस्ति तादृशाय नमो ऽस्तु नः॥२३॥
रोदयत्यात्मविमुखानिति रुद्रः प्रकीर्तितः ।
रुत्संसाराभिदं(r. र्धं) दुःखं तद्विद्रावयतीतिवा॥२४॥०२९॥
अग्रे ऽप्यस्तु नयत्येवमनुषंगो यथोचितं ।

उतो त इषव इति ।

उतो इत्यपि चेत्यर्थे ते तवेषुः शरः स्मृतः ॥ ३० ॥
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
सुवर्णाचलरूपाय धन्वने धनुषे नमः ॥ ३१ ॥
बाहुभ्यामुत बाहुभ्यामपि ते तव नो नमः ।
अनंतबाहुविश्वेषो वेदानामप्यगोचरः ॥ ३२ ॥ ० १२५ ॥

शशिपंजराय । शशिपर्वालतृणं तद्वज्जरः पिंजर इत्ययं ।
शशिपंजरो हरस्तस्मै नमः शशिपंजराय ते ॥ १२६ ॥ ०

It ends:

एकादशो ऽपि पापघ्नो ऽनुवाको विवृतो ऽखिलः ।
अहोबलेन सुधिया शिवसंतुष्टिहेतुना ॥ [४]७२ ॥ °
व्याख्या श्रीमदहोबलेन रचिता श्रीभास्करीयेण या
श्रीरुद्रस्य मनोहरातिसुगमा संवीक्ष्य भाष्याणि सा ।
श्रीविश्वेशपदारविंदनिरतस्वांतातिसंतोषदा
व्याख्याकल्पलता मनोज्ञफलदा संशीलता(*r.* °लिता)
[सादरं ॥ [४]७४ ॥ °
महेश त्वद्वारि(*r.* चि) स्फुरतु रुचिरा वागतितरां
ममैषा निर्दोषा जय जय महेशेति सततं ।
शिवा सैषा वाणी भवतु शिवदा मज्जमनिशं
महेशानार्यं मां शरणद सनार्यं कुरु विभो ॥ [४]७८ ॥
